प्रारम्भिकी

संस्कृत भाषा संसार की समस्त प्रचलित विज्ञानपूर्ण भाषाओं की उद्‌गमभूमि और सुसम्पन्न भाषा है। विश्व के सभी विद्वान् इस विषय मे एकमत है कि उसका साहित्य अत्यन्त मधुर और सर्वाङ्ग सुन्दर है। भारतीय जीवन, विशेषत आदिम आर्य संस्कृति के उज्ज्वल चित्रो का जैसा अङ्कन संस्कृत साहित्य में है वैसा अन्यत्र दुर्लभ है।

अब तक संस्कृत के प्राथमिक शिक्षार्थियों के सामने अनेक प्रकार के संग्रह लाये गये है, जो अध्ययन करनेवाले छात्रों के लिए विभिन्न रीतियो से उपयुक्त हे किन्तु ध्यानपूर्वक देखने से यह प्रतीत होता है कि उनमें एकरसता की मात्रा अधिक है। आधुनिक युग का छात्र कुछ परिमित कवियों और नाटककारो की रचना का आस्वाद करके ही तृप्त नहीं होना चाहता। उसे तो संस्कृत-साहित्य के समग्र प्रतिनिधि निर्माताओं की रसधारा की प्यास लगी है। इसी दृष्टिकोण से यह नवीन सङ्कलन किया गया है।

इस सङ्कलन मे इस बात पर पूर्णरूपेण ध्यान दिया गया है कि इसके स्वाध्याय से पाठको, विशेषत किशोर ग्रहीताओ के समक्ष भारत के स्वर्णिम अतीत का एक सांस्कृतिक चित्र मूर्तिमान् हो उठे। चारित्र्य, शील, ओज, स्वास्थ्य, धर्मभाव, आदि जीवन के आदर्श सद्‌गुणो के संस्कारो

को प्रबुद्ध करने का लक्ष्य प्रत्येक पाठ में निहित है। सम्पादकों ने परिश्रम पूर्वक संस्कृत वाङ्मय के अखिल माधुर्य मधु को इस छोटे से संग्रह चषक में भरते हुए इस बात का विश्वास किया है कि इससे प्रवेशिका आदि के अध्येताओं को भारतीय गद्य पद्य परम्परा का सच्चा अन्तर्दर्शन होगा। तथाऽस्तु।

आश्विन कृष्ण
मातृनवमी
२००२

ईशदत्त शास्त्री 'श्रीश'
प्रभात शास्त्री



पाठ-सूची

——

संस्कृत-साहित्य-सरणिः

मङ्गलाचरणम्

(१)

या सृष्टि स्रष्टुराद्या वहति विधि-हुत या हविर्या च होत्री,
ये द्वे काल विधत्त, श्रुति-विषय-गुणा या स्थिता व्याप्य विश्वम्।
यामाहु सर्व बीज-प्रकृतिरिति यया प्राणिन प्राणवन्त,
प्रत्यक्षाभि प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीश ॥

(२)

य शैवा समुपासते शिव इति ब्रह्मेति वेदान्तिनो,
बौद्धा बुद्ध इति प्रमाण पटव कर्त्तेति नैयायिका।
अर्हन्नित्यथ जैन शासन-रता कर्मेति मीमांसका,
सोऽय वो विदधातु वाञ्छित फल त्रैलोक्य-नाथो हरि ॥

(३)

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते,
दैत्यान्दारयते बलि छलयते क्षत्र-क्षय कुर्वते।
पौलस्त्यञ्जयते हल फलयते कारुण्यमातन्वते,
म्लेच्छान्मूर्छयते दशाकृति-कृते कृष्णाय तुभ्य नम ॥

——

अथ मातापित्रोर्गुरोश्च शुश्रूषा

[मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव—तैत्तिरी०]

आचार्यो ब्रह्मणो मूर्ति पिता मूर्ति. प्रजापते ।
माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मन ॥
आचार्यश्च पिता चैव माता भ्राता च पूर्वज ।
नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषत ॥

य मातापितरौ क्लेश सहेते सम्भवे नृणाम् ।
न तस्य निष्कृति शक्या कर्तु वर्षशतैरपि ॥
तयोर्नित्य प्रिय कुर्यादाचार्यस्य च सर्वदा ।
तेष्वेव त्रिषु तुष्टेषु तप सर्व समाप्यते ॥
तेषां त्रयाणां शुश्रूषा परम तप उच्यते ।
न तैरभ्यननुज्ञातो धर्ममन्य समाचरेत् ॥
त एव हि त्रयो लोकास्त एव त्रय आश्रमा ।
त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नय ॥
पिता वै गार्हपत्योऽग्निर्माताऽग्निर्दक्षिण स्मृत. ।
गुरुराहवनीयस्तु साऽग्नित्रेता गरीयसी ॥
त्रिष्वप्रमाद्यन्नेतेषु त्रीन् लोकान्विजयेद्गृही ।
दीप्यमान स्ववपुषा देववद्दिवि मोदते ॥
इम लोक मातृभक्त्या पितृभक्त्या तु मध्यमम् ।
गुरुशुश्रूषया त्वेव ब्रह्मलोक समश्नुते ॥
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृता ।
अनादृतास्तु यस्यैते सर्वास्तस्याफला. क्रिया ॥
यावत् त्रयस्ते जीवेयुस्तावन्नान्य समाचरेत् ।
तेष्वेव नित्य शुश्रूषां कुर्यात्प्रियहिते रत ॥

तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् ।
तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ॥
त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते ।
एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते ॥

रावणविभीषणयोर्विवादः

[ततः प्रविशति विभीषणः]

विभीषणः—(सविमर्शम्) अहो नु खलु महाराजस्य विपरीता बुद्धिः संवृत्ता । कुतः—

मयोक्तो मैथिलीं तस्मै बहुशो दीयतामिति ।
न मे शृणोति वचनं सुहृदां शोककारणात् ॥

(उपेत्य) जयतु महाराजः ।

रावणः—विभीषण ! एह्येहि । उपविश ।

विभीषणः—एष एष उपविशामि । (उपविशति)

रावणः—विभीषण ! निर्विण्णमिव त्वां लक्षये ।

विभीषणः—निर्वेद एव खल्वनुक्तग्राहिणं स्वामिनमुपाश्रितस्य भृत्यजनस्य ।

रावणः—छिद्यतामेषा कथा त्वमपि तावद् वानरमानय ।

विभीषणः—यदाज्ञापयति महाराजः (निष्क्रान्तः)

[ततः प्रविशति राक्षसैर्गृहीतो हनूमान्]

सर्वे—आः इत इतः ।

हनूमान्—

नैवाहं धर्षितस्तेन नैऋतेन दुरात्मना ।
स्वयं ग्रहणमापन्नो राक्षसेशदिदृक्षया ॥

(उपगम्य) भो राजन् ! अपि कुशली भवान् ?

रावण —(सावज्ञम्) किमस्य तत्कर्म ?

विभीषण —महाराज ! अतोऽप्यधिकम् ।

रावण —कथ त्वमवगच्छसि ?

विभीषण —प्रष्टुमर्हति महाराज 'कस्त्वमिति ।

रावण.—भो वानर ! कस्त्वम् ? केन कारणेन धर्षितोऽस्माकमन्त पुर प्रविष्ट ?

हनूमान्—भो श्रूयताम्,

अञ्जनाया समुत्पन्नो, मारुतस्यौरस सुत ।
प्रेषितो राघवेणाह, हनूमान् नाम वानर ॥

विभीषण —महाराज ! कि श्रुतम् ?

विभीषण —हनूमान् ! किमाह तत्र भवान् राघव. ।

हनूमान्—भो ! श्रूयता रामशासनम् ।

रावण —कथ कथ रामशासनमित्याह ? आ हन्यतामय वानर ।

विभीषण'—प्रसीदतु प्रसीदतु महाराज. । सर्वापराधेष्ववध्या खलु दूता । अथवा रामस्य वचन श्रुत्वा पश्चाद्यथेष्ट कर्तुमर्हति महाराज ।

रावण —भो वानर ! किमिह स मानुष ?

हनूमान्—भो श्रूयताम् —

वर शरणमुपेहि शकर वा,
प्रविशाय दुर्गतम रसातल वा ।
शरवरपरभिन्नसर्वगात्रम्,
यमसदन प्रति यापयाम्यह त्वाम् ॥

रावण —ह ह ह !

दिव्यास्त्रैस्त्रिदशगणा मयाभिभूता,
दैत्येन्द्रा मम वशवर्त्तिन. समस्ता ।
पौलस्त्योऽप्यपहृतपुष्पकोऽवसन्नो,
भो ! राम कथमभियाति मानुषो माम् ॥

हनूमान्—एवंविधेन भवता किमर्थं प्रच्छन्नं तस्य दारापहरणं कृतम् ?

विभीषण —सम्यगाह हनूमान् ।

अपास्य मायया रामं त्वया राक्षसपुङ्गव ।
भिक्षुवेषं समास्थाय छलेनापहृता हि सा ॥

रावण —विभीषण ! किं विपक्षपक्षमवलम्बसे ?

विभीषण —

प्रसीद राजन् ! वचनं हितं मे,
प्रदीयतां राघवधर्मपत्नी ।
इदं कुलं राक्षसपुंगवेन,
त्वया हि नेच्छामि विपद्यमानम् ॥

रावण —विभीषण ! अलमलं भयेन ।

कथं लम्बसटः सिंहो मृगेण विनिपात्यते ।
गजो वा सुमहान् मत्तः शृगालेन निहन्यते ॥

हनूमान्—भो रावण ! विपद्यमानभाग्येन भवता किं युक्तं राघवमेवं वक्तुम् । मा तावद् भो !

नक्तंचरापसद ! रावण ! राघवं तं
वीराग्रगण्यमतुलं त्रिदशेन्द्रकल्पम् ।
प्रक्षीणपुण्य ! भवताभुवनैकनाथं
वक्तुं किमेवमुचितं गतसार ! नीचैः ॥

रावण —कथं कथं नामाभिधत्ते ? हन्यतामयं वानरः । अथवा दूतवधः खलु वचनीयः । शंकुकर्ण ! लाङ्गूलमादीप्य विसृज्यतामयं वानरः ।

शंकुकर्ण —यथाज्ञापयति महाराजः । इत इतः ।

रावण —अथवा एहि तावत् ।

हनूमान्—अयमस्मि ।

रावण —अभिधीयतां मद्वचनात्स मानुषः ।

अभिभूतो मया राम ! दारापहरणादसि ।
यदि तेऽस्ति धनु श्लाघा दीयतां मे रणो महान् ॥

हनूमान्—अचिराद् द्रक्ष्यसि ।

अभिहतवरवप्रगोपुराट्टाम,
रघुवरकार्मुकनादनिर्जितस्त्वम ।
हरिगणपरिपीडितैस्समन्तात्,
प्रमदवनैरभिसन्वृतां स्वलङ्काम ॥

रावण —आ, निर्वास्यतामय वानर ।

राक्षसा —इत इत ।

(रक्षोभिस्सह निष्क्रान्तो हनूमान्)

विभीषण.—प्रसीदतु प्रसीदतु महाराज । अस्ति काचिद्विवक्षा महाराजस्य हितमन्तरेण ।

रावण —उच्यताम् । तच्छ्रेयो वयमपि श्रोतार ।

विभीषण —सर्वथा राक्षसकुलस्य विनाशोऽभ्यागत इति मन्ये ।

रावण —केन कारणेन ?

विभीषण —महाराजस्य विप्रतिपत्त्या ।

रावण —का मे विप्रतिपत्ति ?

विभीषण —ननु सीतापहरणमेव ।

रावण —सीतापहरणे को दोष स्यात् ?

विभीषण —अधर्मश्च ।

रावणः—च शब्देन सावशेषमिव ते वचनम् । तद् ब्रूहि ।

विभीषण —तदेव ननु ।

रावण —विभीषण ! किं गूहसे मम खलु प्राणै शापित स्या यदि सत्य न ब्रूया ।

विभीषण —अभय दातुमर्हति महाराज ।

रावण —दत्तमभयम् । उच्यताम् ।

विभीषण —बलवद्विग्रहश्च ।

रावण —(सरोषम्) कथं कथं बलवद्विग्रहो नाम ।

शत्रुपक्षमुपाश्रित्य मामय राक्षसाधम,
क्रोधमाहारयन्तीव्रमभीरुरभिभाषते ।

कोऽत्र ?

ममानवेक्ष्य सौभ्रात्रं शत्रुपक्षमुपाश्रितम्,
नोत्सहते पुरतो द्रष्टुं तस्मादेष निरस्यताम् ॥

विभीषणः—प्रसीदतु प्रसीदतु महाराज । अहमेव यास्यामि ।

शासितोऽहं त्वया राजन् । प्रयामि नयदोषवान् ।
त्यक्त्वा रोषञ्च कामञ्च यथा कार्यं तथा कुरु ॥

(परिक्रम्य) अयमिदानीं—

अद्यैव तं कमललोचनमुग्रचापं,
राम हि रावणवधाय कृतप्रतिज्ञम् ।
सश्रित्य संश्रितहितप्रथितं नृदेवं,
नष्टं निशाचरकुलं पुनरुद्धरिष्ये ॥

(निष्क्रान्तः ।)

सीतायाः रावणं प्रत्युत्तरम्

रावणेनैवमुक्ता तु कुपिता जनकात्मजा ।
प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ॥

महागिरिमिवाकम्पं महेन्द्रसदृशं पतिम् ।
महोदधिमिवाक्षोभ्यमहं राममनुव्रता ॥

सर्वलक्षणसम्पन्नं न्यग्रोधपरिमण्डलम् ।
सत्यसन्धं महाभागमहं राममनुव्रता ॥

महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् ।
नृसिंहं सिंहसंकाशमहं राममनुव्रता ॥

पूर्णचन्द्राननं राम राजवत्सं जितेन्द्रियम् ।
पृथुकीर्ति महाबाहुमहं राममनुव्रता ॥

त्वं पुनर्जम्बुकः सिंहीं मामिहेच्छसि दुर्लभाम् ।
नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा ॥

क्षुधितस्य हि सिंहस्य मृगशत्रोस्तरस्विनः ।
आशीविषस्य वदनाद्दंष्ट्रामादातुमिच्छसि ॥

मन्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि ।
कालकूटं विषं पीत्वा स्वस्तिमान् गन्तुमिच्छसि ॥

अक्षिसूच्या प्रमृजसि जिह्वया लेढि च क्षुरम् ।
राघवस्य प्रियां भार्यामधिगन्तुं त्वमिच्छसि ॥

अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि ।
सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि ॥

कल्याणवृत्तां यो भार्यां रामस्याहर्तुमिच्छसि ।
अयोमुखानां शूलानां मध्ये चरितुमिच्छसि ॥

वर्षा-वर्णनम्

अयं स कालः सम्प्राप्तः, समयोऽद्य जलागमः ।
संपश्य त्वं नभो मेघैः, संवृतं गिरिसन्निभैः ॥

क्वचित्प्रकाशं क्वचिदप्रकाशम्,
नभः प्रकीर्णाम्बुधरं विभाति ।
क्वचित्क्वचित्पर्वतसंनिरुद्धम्,
रूपं यथा शान्तमहार्णवस्य ॥

व्यामिश्रितं सर्जकदम्बपुष्पैः,
नवं जलं पर्वतधातुताम्रम् ।

मयूरकेकाभिरनुप्रयातम् ,
शैलापगा शीघ्रतर वहन्ति ॥
रसाकुल षट्पदसन्निकाश ,
प्रभुज्यते जम्बुफल प्रकामम ।
अनेकवर्णं पवनावधूतम् ,
भूमौ पतत्याम्रफल विपक्वम् ॥
मेघाभिकामा परिसपतन्ती,
समोदिता भाति बलाकपक्ति ।
वातावधूता वरपौण्डरीकी,
लम्बेव माला रुचिराम्बरस्य ॥
वहन्ति वर्षन्ति नदन्ति भान्ति,
ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ता ,
प्रियाविहीना शिखिन प्लवङ्गमा ॥
धारानिपातैरभिहन्यमाना ,
कदम्बशाखासु विलम्बमाना ।
क्षणार्जित पुष्परसावगाढम् ,
शनैर्मद षट्चरणास्त्यजन्ति ॥
षट्पादतन्त्रीमधुराभिधारम ,
प्लवङ्गमोदीरितकण्ठतालम् ।
आविष्कृत मेघमृदङ्गनादै ,
वनेषु सङ्गीतमिव प्रवृत्तम ॥
स्वनैर्घनाना प्लवगा प्रबुद्धा ,
विहाय निद्रा चिरसन्निरुद्धाम् ।
अनेकरूपाकृतिवर्णनादा ,
नवाम्बुधाराभिहता नदन्ति ॥

नरैर्नरेन्द्रा इव पर्वतेन्द्रा ,
सुरेन्द्रनीते पवनोपनीते ।
घनाम्बुकुम्भैरभिषिच्यमाना ;
रूपं श्रियं स्वामिव दर्शयन्ति ॥

महान्ति कूटानि महीधराणाम ,
धाराविधौतान्यधिकं विभान्ति ।
महाप्रयाणैर्विपुलैः प्रपातैः ,
मुक्ताकलापैरिव लम्बमानैः ॥

शैलोपलप्रस्खलमानवेगा ,
शैलोत्तमाना विपुलाः प्रपाताः ।
गुहासु सनादितबर्हिणासु ,
हारा विकीर्यन्त इवावभान्ति ॥

शीघ्रप्रवेगा विपुला प्रयाता ,
निर्धौतशृङ्गोपतला गिरीणाम् ।
मुक्ताकलापप्रतिमापतन्तो ,
महागुहोत्सङ्गतलैर्ध्रियन्ते ॥

विदुलायाः पुत्रोद्बोधनम्

क्षत्रधर्मरता दान्ता विदुला दीर्घदर्शिनी ।
विश्रुता राजससत्सु श्रुत-वाक्या बहुश्रुता ॥
विदुलानाम राजन्या जगर्हे पुत्रमौरसम् ।
निर्जितं सिन्धुराजेन शयानं दीनचेतसम् ॥
अनन्दन ! मया जातं द्विषतां हर्षवर्द्धन ।
न मया त्वं च पित्रा च जातं क्वाभ्यागतो ह्यसि ?

निर्मन्युश्चाप्यसंख्येय पुरुष क्लीवसाधन ।
यावज्जीवं निराशोसि कल्याणाय धुर वह ॥

मात्मानमवमन्यस्व मैनमल्पेन वीभरः ।
मन. कृत्वा सुकल्याण मा भैस्त्व प्रतिसहर ॥

उत्तिष्ठ हे कापुरुष मा शेष्वैव पराजित. ।
अमित्रान्नन्दयन्सर्वान्निर्मानो बन्धुशोकद ॥

सुपूरा वै कुनदिका सुपूरो मूषिकाञ्जलि ।
सुसन्तोष कापुरुष. स्वल्पकेनैव तुष्यति ॥

अप्यहेरारुजन् दंष्ट्रामाश्वेव निधन व्रज ।
अपि वा सशय प्राप्य जीवितेपि पराक्रमे ॥

अप्यरे श्येनवच्छिद्र पश्येस्त्व विपरिक्रमन् ।
विवदन् वाथवा तूष्णीं व्योम्नीवापरिशङ्कित ॥

त्वमेव प्रेतवच्छेषे कस्माद् वज्रहतो यथा ।
उत्तिष्ट हे कापुरुष । मा स्वाप्सी शत्रुनिर्ज्जित ॥

मास्तगमस्त्व कृपणो विश्रूयस्व स्वकर्मणा ।
मा मध्ये मा जघन्ये त्वं माऽधो भू तिष्ठ गर्ज्जित ॥

अलात तिन्दुकस्येव मुहूर्त्तमपि हि ज्वल ।
मा तुषाग्निरिवानर्च्चिर्धूमायस्व जिजीविषु ॥

कृत्वा मानुष्यक कर्म सृष्ट्वाजिं यावदुत्तमम् ।
धर्मस्यानृण्यमाप्नोति न चात्मान विगर्हते ॥

उद्भावयस्व वीर्य्यं वा ता वा गच्छ ध्रुवा गतिम् ।
धर्म पुत्राग्रत कृत्वा किं निमित्त हि जीवसि ॥

इष्टापूर्त्त हि ते क्लीव कीर्त्तिश्च सकला हता ।
विच्छिन्न भोगमूल ते किं निमित्त हि जीवसि ॥

शत्रुर्निमज्जता ग्राह्यो जङ्घायां प्रपतिष्यता ।
विपरिच्छिन्नमूलोऽपि न विषीदेत् कथञ्चन ॥

उद्यम्य धुरमुत्कर्षेदाजानेयकृतं स्मरन् ।
कुरु सत्त्वञ्च मानञ्च विद्धि पौरुषमात्मनः ॥

उद्भावय कुलं मग्नं त्वत्कृते स्वयमेव हि ।
यस्य वृत्तं न जल्पन्ति मानवा महदद्भुतम् ॥

राशिवर्द्धनमात्रं स नैव स्त्री न पुनः पुमान् ।
दाने तपसि सत्ये च यस्य नोच्चारितं यशः ॥

विद्यायामर्थलाभे वा मातुरुच्चार एव सः ।
श्रुतेन तपसा वापि श्रिया वा विक्रमेण वा ॥

लोकस्य समवज्ञातं विहीनासनवाससम् ।
अहो लाभकरं हीनमल्पजीवनमल्पकम् ॥

नेदृशं बन्धुमासाद्य बान्धवः सुखमेधते ।
अवृत्त्यैव विपत्स्यामो वयं राष्ट्रात् प्रवासिताः ॥

सर्वकामरसैर्हीना स्थानभ्रष्टा अकिञ्चनाः ।
अवल्गुकारिणं सत्सु कुलवंशस्य नाशनम् ॥

कलिं पुत्रप्रवादेन सञ्जय ! त्वामजीजनम् ।
निरमर्षं निरुत्साहं निर्वीर्यमरिनन्दनम् ॥

मा स्म सीमन्तिनी काचिज्जनयेत् पुत्रमीदृशम् ।
मा धूमाय ज्वलात्यन्तमाक्रम्य जहि शात्रवान् ॥

ज्वल मूर्धन्यमित्राणां मुहूर्त्तमपि वा क्षणम् ।
एतावानेव पुरुषो यदमर्षी यदक्षमी ॥

क्षमावान्निरमर्षश्च नैव स्त्री न पुनः पुमान् ।
सन्तोषो वै श्रियं हन्ति तथानुक्रोश एव च ॥

आयसं हृदयं कृत्वा मृगयस्व पुनः स्वकम् ।
परं विषहते यस्मात् तस्मात् पुरुष उच्यते ॥

तमाहुर्व्यर्थनामानं स्त्रीवद्य इह जीवति ।
शूरस्योर्जितसत्त्वस्य सिंहविक्रान्तचारिणः ॥

दिष्टभावं गतस्यापि विषये मोदते प्रजा ।
य आत्मनः प्रियसुखे हित्वा मृगयते श्रियम् ॥

स्वास्थ्य-चर्या

नानृतं ब्रूयात्, नान्यस्वमाददीत, न वैरं रोचयेत्, न कुर्यात् पापं, नान्यदोषान् ब्रूयात्, नान्यरहस्यमागमयेत्, नाधार्मिकैर्न नरेन्द्रद्विष्टैः सहासीत नोन्मत्तैर्न पतितैर्न भ्रूणहन्तृभिर्न क्षुद्रैर्न दुष्टैः, न दुष्टयानान्यारोहयेत्, न जानुसमं कठिनमासनमध्यासीत, नानास्तीर्णमनुपहितमविशालमसमं वा शयनं प्रपद्येत, न गिरिविषममस्तकेष्वनुचरेत्, न द्रुममारोहेत्, न जलोग्रवेगमवगाहेत, कूलच्छायां नोपासीत, नाग्न्युत्पातमभितश्चरेत्, नोच्चैर्हसेत्, नासंवृतमुखो जृम्भां क्षवथुं हास्यं वा प्रवर्तयेत्, न नासिकां कुष्णीयात्, न दन्तान् विघट्टयेत्, न नखान् वादयेत्, नास्थीन्यभिहन्यात्, न भूमिं विलिखेत्, न छिन्द्यात्तृणं, न लोष्टं मृद्नीयात्, न विगुणमङ्गैश्चेष्टेत, ज्योतींष्यग्निममेध्यमशस्तं च नाभिवीक्षेत, न हुं कुर्याच्छवं न चैत्यध्वजगुरुपूज्याशस्तच्छायामाक्रामेत्, न क्षपास्वमरसदनचैत्यचत्वरचतुष्पथोपवनश्मशानाघातनान्यासेवेत, नैकः शून्यगृहं न चाटवीमनुप्रविशेत्, नोत्तमैर्विरुध्येत, नावरानुपासीत, नानार्यमाश्रयेत् न भयमुत्पादयेत, न साहसातिस्वप्नप्रजागरस्नानपानाशनान्यासेवेत्, नोर्ध्वजानुश्चिरं तिष्ठेत्, न व्यालानुपसर्पेन्न दंष्ट्रिणो न विषाणिनः, पुरोवातातपावश्यायातिप्रवातान् जह्यात्, कलि

नारभेत, नासुनिभृतोऽग्निमुपासीत, नोच्छिष्टो नाध कृत्वा प्रतापयेत्, नाविगतक्लमो नाप्लुतवदनो न नग्न उपस्पृशेत्, न स्नानशाट्या स्पृशेदुत्तमाग, न केशाग्राण्यभिहन्यात्, नास्पृष्ट्वा रत्नाज्यपूज्य-मगलसुमनसोऽभिनिष्क्रामेत्, न पूज्यमगलान्यपसव्य गच्छेन्नेतराण्य-नुदक्षिणम्।

न स्त्रियमवजानीत, नातिविश्रम्भयेत्, न गुह्यमनुश्रावयेत्, नाधि कुर्यात्। न सतो न गुरून् परिवदेत्, नाशुचिरभिचारकर्मचैत्यपूज्यपूजाध्य यनमभिनिर्वर्तयेत्।

न विद्युत्स्वनार्तवीषु नाभ्युदितासु दिक्षु नाग्निसप्लवे न भूमिकम्पे न महोत्सवे नोल्कापाते न महाग्रहोपगमने न नष्टचन्द्राया तिथौ न सन्ध्ययोर्नामुखाद् गुरोर्नावपतित नातिमात्र नतान्त नाति क्लीव नात्यु-च्चैर्नातिनीचै स्वरैरध्ययनमभ्यसेत्।

नातिसमय जह्यात्, न नियम भिन्द्यात्, न नक्त नादेशे चरेत्, न बालवृद्धलुब्धमूर्खक्लिष्टक्लीबै सह सख्य कुर्यात्, न मद्यद्यूतरुचि स्यात्, न गुह्य विवृणुयात्, न कञ्चिदवजानीयात्, नाहमानी स्यान्नादक्षो नाद-क्षिणो नासूयक, न ब्राह्मणान् परिवदेत्, न गवा दण्डमुद्यच्छेत्, न वृद्धान् न गुरून् वाऽधिक्षिपेत् न चातिब्रूयात्, न बान्धवानुरक्तकृच्छ्र-द्वितीयगुह्यज्ञान् बहि कुर्यात्।

नाशुचिरुत्तमाज्याक्षततिलकुशसर्षपैरग्नि जुहुयादात्मानमाशीभिराशा-सान अग्निर्मे नापगच्छेच्छरीरात् वायुर्मे प्राणानादधातु विष्णुर्मे बलमाद-धातु इन्द्रो मे वीर्य, शिवा मा प्रविशन्त्वाप, आपोहिष्ठेत्यप स्पृशेत्, द्वि परिमृज्योष्ठौ पादौ चाभ्युक्ष्य मूर्धनि खानि चोपस्पृशेदद्भिरात्मान हृदय शिरश्च, ब्रह्मचर्यज्ञानदानमैत्रीकारुण्यहर्षोपेक्षाप्रशमपरश्च स्यादिति।

वैदेह्या वनं प्रति निर्वासः

अथ व्यवस्थापितवाक्कथचित्सौमित्ररन्तर्गतवाष्पकण्ठ ।
औत्पातिक मेघ इवाश्मवर्ष महीपते शासनमुज्जगार ॥
ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना ।
स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम ॥
इक्ष्वाकुवंशप्रभव कथ त्वा त्यजेदकस्मात्पतिरार्यवृत्त ।
इति क्षिति संशयितेव तस्यै ददौ प्रवेश जननी न तावत् ॥
सा लुप्तसंज्ञा न विवेद दुःख प्रत्यागतासु समतप्यतान्त ।
तस्या सुमित्रात्मजयत्नलब्धो मोहादभूत्कष्टतर प्रबोध ॥
आश्वास्य रामावरज सतीं तामाख्यातवाल्मीकिनिकेतमार्गे ।
निघ्नस्य मे भर्तृनिदेशरौक्ष्य देवि क्षमस्वेति बभूव नम्र ॥
सीता तमुत्थाप्य जगाद वाक्य प्रीतास्मि ते सौम्य चिराय जीव ।
बिडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थ परवानसि त्वम् ॥
श्वश्रूजन सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणाम ।
प्रजानिषेक मयि वर्तमान सूनोरनुध्यायत चेतसेति ॥
वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम् ।
मा लोकवादश्रवणादहार्सी श्रुतस्य किं तत्सदृश कुलस्य ॥
कल्याणबुद्धेरथवा तवाय न कामचारो मयि शंकनीय ।
ममैव जन्मान्तरपातकाना विपाकविस्फूर्जथुरप्रसह्य ॥
उपस्थिता पूर्वमपास्य लक्ष्मीं वन मया सार्धमसि प्रपन्न ।
तदास्पद प्राप्य तयातिरोषात्सोढास्मि न त्वद्भवने वसन्ती ॥
निशाचरोपप्लुतभर्तृकाणा तपस्विनीना भवत प्रसादात् ।
भूत्वा शरण्या शरणार्थमन्य कथ प्रपत्स्ये त्वयि दीप्यमाने ॥
किं वा तवात्यन्तवियोगमोघे कुर्यामुपेक्षा हतजीवितेऽस्मिन् ।
स्याद्रक्षणीय यदि मे न तेजस्त्वदीयमन्तर्गतमन्तराय ॥
साऽह तप सूर्यनिविष्टदृष्टिरूर्ध्व प्रसूतेश्चरितु यतिष्ये ।
भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोग ॥

नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः ।
निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया ॥
तथेति तस्याः प्रतिगृह्य वाचं रामानुजे दृष्टिपथं व्यतीते ।
सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विग्ना कुररीव भूयः ॥
नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः ।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि ॥
तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥
तमश्रु नेत्रावरणं प्रमृज्य सीता विलापाद्विरता ववन्दे ।
तस्यै मुनिर्दोहदलिङ्गदर्शी दाश्वान्सुपुत्राशिषमित्युवाच ॥

नवाभिषिक्तं युवराजं प्रति मंत्रिणः उपदेशः

अतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रेऽस्मिन् कुमार ! तथा प्रयतेथा यथा नोपहस्यसे जनैः । न निन्द्यसे साधुभिः । न धिक्क्रियसे गुरुभिः । नोपालभ्यसे सुहृद्भिः । न शोच्यसे विद्वद्भिः । यथा च न प्रकाश्यसे विटैः । न प्रतार्यसे कुशलैः । नावलुप्यसे सेवकवृकैः । न वञ्च्यसे धूर्तैः । न विडम्ब्यसे लक्ष्म्या । न नर्त्यसे मदेन । नाक्षिप्यसे विषयैः । नापकृष्यसे रागेण । नापह्रियसे सुखेन । कामं भवान् प्रकृत्यैव धीरः, पित्रा च समारोपितसंस्कारः । तरलहृदयमप्रतिबुद्धं च मदयन्ति धनानि ।

तथापि भवद्गुणसंतोषो मामेवं मुखरीकृतवान् । इदमेव च पुनः पुनरभिधीयसे । विद्वांसमपि सचेतनमपि महासत्त्वमपि अभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति । सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान् नवयौवराज्याभिषेकमङ्गलम् । कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम् । अवनमय द्विषतां

शिरासि, उन्नमय स्वबन्धुवर्गम्। अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन्, विजितामपि तव पित्रा सप्तद्वीपभूषणा पुनर्विजयस्व वसुन्धराम्।

अयं च ते कालः प्रतापमारोपयितुम्। आरूढप्रतापो राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति। इत्येतावदभिधायोपशशाम।

लोभनिन्दा

लोभः सदा विचिन्त्यो लुब्धेभ्यः सर्वतो भयं दृष्टम्।
कार्याकार्यविचारो लोभाक्रष्टस्य नास्त्येव॥

सत्त्वप्रशमतपोभिः सत्त्वधनैः शास्त्रवेदिभिर्विजितः।
लोभोऽवटं प्रविष्टः कुटिलं हृदयं किराटानाम्॥

हृत्वा धनं जनानां दिनमखिलं विविधकूटमायाभिः।
वितरति गृहे किराटः कष्टेन वराटकत्रितयम्॥

आख्यायिकानुरागी व्रजति सदा पुण्यपुस्तकं श्रोतुम्।
दष्ट इव कृष्णसर्पैः पलायते दानधर्मेभ्यः॥

द्वादश्यां पितृदिवसे संक्रमणे सोमसूर्ययोर्ग्रहणे।
सुचिरं स्नानं कुरुते न ददाति कपर्दिकामेकाम्॥

दत्त्वा दिशि दिशि दृष्टिं याचकचकितोऽवगुण्ठनं कृत्वा।
चौर इव कुटिलचारी पलायते विकटरथ्याभिः॥

न ददाति प्रतिवचनं विक्रयकाले शठो वणिङ्मौनी।
निक्षेपपाणिपुरुषं दृष्ट्वा सम्भाषणं कुरुते॥

उत्तिष्ठति नमति वणिक् कुशलं पृच्छति ददाति च स्थानम्।
निक्षेपपाणिपुरुषं दृष्ट्वा धर्म्यां कथां कुरुते॥

यश्चिद्ददति तमेत्य द्रविणं निक्षिप्य हन्त गन्तास्मि।
भ्रातः परं प्रभाते विष्टिदिनं किं करोम्यद्य॥

तच्छ्रुत्वा विकसितदृग् वदति स मिथ्यैव नाटयन् खेदम् ।
कार्य प्रसारिताच पुन पुन पार्श्वमवलोक्य ॥

त्वदधीन स्थानमिद किंतु चिर न्यासपालन कठिनम् ।
विषमौ च देशकालौ साधोस्तव तदपि दासोऽहम् ॥

इत्यादि मुग्धवृद्धेरसमञ्जसवर्णन गृह कृत्वा ।
गृह्णाति कनकनिकर नृत्यस्तत्तन्मनोरथै पाप ॥

तत्सचूर्णनिजातै क्रयविक्रयलाभराशिभिरनन्तै ।
भाण्डप्रतिभाण्डचर्यैरुपहसति धनाधिनाथ म ॥

दानोपभोगविरहितहिरण्यरत्नाकृतत्तणा सततम् ।
ससारजीर्णमन्दिरविषममहामूषका वणिज ॥

अटति समुत्कटवेष्टितविकटपटस्फुटफटाटोप ।
कुटिल कण्टकनिचित पुरयतिनामा निधिव्याल ॥

अथ पुरुष स दिगन्त भ्रान्त्वा केनापि दैवयोगेन ।
नष्टधनो जनरहित प्राप्त सुचिरान्निज देशम् ॥

पृच्छति कमपि सशाक स किराट क्व नु गतो महासत्त्व ।
तमुपेत्य वदति कश्चित्तस्याद्य सखे विभूतिरन्यैव ॥

श्रुत्वैतदतुलविस्मयलोलितमौलि स तद् गृह गत्वा ।
द्वारे स्थगितस्तिष्ठति निष्प्रतिभो जीर्णकर्पट सुचिरम् ॥

त तुङ्गभवनवलभीजालान्तरतो वणिक् परिज्ञाय ।
नोच्छ्वसिति नष्टचेष्टस्ताडित इव मूर्ध्नि वज्रेण ॥

उपसृत्य मन्दमन्द कथमपि सम्प्राप्तनिर्जनावसर ।
त याचते स पुरुषो द्रविण स्व प्रकटिताभिख्य ॥

त वदति सोऽन्यदृष्टि सभ्रूभङ्ग विधूतहस्ताग्र ।
वञ्चकवचन पापो वृत्तिक्षीण कुतोऽयमायात ॥

कस्त्व कस्य कुतो वा दर्शनमपि न स्मरामि कि कथनै ।
अहह कदा कुत्र त्व वद कस्य किमर्पित केन ॥

पश्यत कष्टमनिष्टं कलिकालः कीदृशोऽयमायातः ।
मत्तोऽर्थमेष वाञ्छति लोको जानाति वा सर्वम् ॥

तदपि सततामिशासी प्रत्याख्येयो जनः कथं महताम् ।
कथय दिनं तद्दिवसे लिखितं सर्वं स्वयं पश्य ॥

वृद्धोऽहं न्यस्तभरः पुत्रो सर्वं ममास्ति लिखितं हि ।
इति तेन विनष्टधृतिः स विसृष्टस्तत्सुतान्तिकं प्राप ॥

तातो जानाति सुतो जानाति पितैव लिखति सकलं यत् ॥
इति तस्य भवति सुचिरं गतागतं कन्दुकस्येव ॥

राजकुलद्वारगते तस्मिन् प्राप्तप्रवासदत्तार्थे ।
सहते नरपतिकोपं त्यजति किराटो न लेख्यकस्याशाम् ॥

परिपीडितः स राज्ञा विविधैरपि यातनाशतैः ।
मम हस्ते निक्षिप्तं किञ्चिन्नास्तीति वक्त्येव ॥

तस्माल्लोभसमुत्था कपटकला कुटिलवर्तिनी माया ।
लुब्धहृदयेषु निवसति नालुब्धो वञ्चनां कुरुते ॥

यज्ञाऽश्वः

सम्भ्रान्ता वटवः—[प्रविश्य] कुमार, कुमार, अश्वोऽश्व इति कोऽपि नूतनविशेषो जनपदेषु श्रूयते । सोऽयमधुनाऽस्माभिः प्रत्यक्षीकृतः ।

लवः—अश्व इति पशुसमाम्नाये साङ्ग्रामिके च पठ्यते तद् ब्रूत कीदृशः ।

वटवः—श्रूयताम् ।

पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।

शष्पाण्यत्ति प्रकिरति शकृत्-पिण्डकानाम्रमात्रान्,
किवाऽऽख्यातैः व्रजति सपुनर्दूरमेह्यहि याम ॥

(इत्युपसृत्याजिने हस्तयोश्चाकर्षति)

लव —[सकौतुकोपरोधविनयम्] आर्या पश्यत, पश्यत, एभिर्नीतोऽस्मि ।

(इति त्वरित परिक्रामति)

अरुन्धतीजनकौ—पूरयतु कौतुकं वत्स ।

कौसल्या—भगवति, जानाम्येतमनालोकयन्ती न जीवामीव ! अतोऽन्यथा भूत्वा प्रेक्षामहे तावद् गच्छन्त दीर्घायुषम् ।

अरुन्धती—अतिजवेन दूरमतिक्रान्त स चपल कथं दृश्यते ?

कञ्चुकी—[प्रविश्य] भगवान् वाल्मीकिराह ज्ञातव्यमेतदवसरे भवद्भिरिति ।

जनक —अतिगम्भीरमेतत् किमपि । भगवत्यरुन्धति, सखि कौसल्ये, आर्य गृष्टे, स्वयमेव गत्वा भगवन्त प्राचेतस पश्याम ।

[इति निष्क्रान्तो वृद्धवर्ग]

(प्रविश्य)

वटव —पश्यतु कुमारस्तदाश्चर्यम् ।

लव —दृष्टमवगत च । नूनमाश्वमेधिकोऽयमश्व ।

वटव —कथं ज्ञायते ?

लव —ननु मूर्खा पठितमेव हि युष्माभिरपि तत्काण्डम् । किं न पश्यथ प्रत्येक शतसंख्या कवचिनो दण्डिनो निषङ्गिणश्च रक्षितार । तत्प्रायमेव बलमिद दृश्यते । यदाह न प्रत्ययस्तद् गत्वा पृच्छत ।

वटव —भो भो किंप्रयोजनोऽयमश्व परिवृत पर्यटति ।

लव'—[सस्पृहमात्मगतम्] अये, अश्वमेध इति नाम विश्व-विजयिना क्षत्रियाणामूर्जस्वल सर्वक्षत्रपरिभावी महानुत्कर्षनिकष ।

[नेपथ्ये]

अयमश्व पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विष ॥

लव —(सगर्वमिव) अहो सन्दीपनान्यक्षराणि ।

वटव —किमुच्यते, प्राज्ञ खलु कुमार ।

लव —भो भो , किमक्षत्रिया पृथिवी यदेवमुद्घोष्यते ।

(नेपथ्ये)

अरे रे, महाराज प्रति कुत क्षत्रिया ।

लव —धिग् जाल्मान् ।

यदि ते सन्ति सन्त्येव केयमद्य विभीषिका ।
किमुक्तैरेभिरधुना ता पताकां हरामि व ॥

भो भो वटव , परिवृत्य लोष्टैरभिघ्नन्तो नयतैनमश्वम् । एष रोहि-नाना मध्य वराकश्चरतु ।

(प्रविश्य सक्रोधदर्प)

पुरुष —धिक् चापल, किमुक्तवानसि । तीक्ष्णतीक्ष्मा ह्यायुधीय-श्रेणय शिशोरपि दृप्ता वाच न सहन्ते । राजपुत्रश्चन्द्रकेतुररिविमर्दन सोऽप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति तावत् त्वरितमनेन तरु गहनेनापसर्पत ।

वटव —कुमार कृतमनेनाश्वेन । तर्जयन्ति विस्फुरितशस्त्रा कुमार मायुधीयश्रेणय । दूरे चाश्रमपदमितस्तदेहि हरिणप्लुतै पलायामहे ।

लव —(विहस्य) किं नाम विस्फुरन्ति शस्त्राणि ।

(इति धनुरारोपयन्) न भेतव्यम् विद्यमानेऽन्तकवक्त्रविडम्बिन्यस्मद्धनुषि ।

(इति यथोचितं परिक्रम्य निष्क्रान्ता सर्वे)

—

अर्थपाल-चरितम्

देव, सोऽहमप्येभिरेव सुहृद्भिरेककर्मोर्मिमालिनेमिभूमिवलयं परिभ्रमन्नुपासरं कदाचित्काशीपुरीं वाराणसीम् । उपस्पृश्य मणिभङ्गनिर्मलाम्भसि मणिकर्णिकायामविमुक्तेश्वरं भगवन्तमन्धकमथनमभिप्रणम्य प्रदक्षिणं परिभ्रमन्पुरुषमेकमायामवन्तमायसपरिघपीवराभ्यां भुजाभ्यामाबध्यमानपरिकरमविरतरुदितोच्छूनताम्रदृष्टिमद्राक्षम् । अतर्कयं च—'कर्कशोऽयं पुरुषः, कार्पण्यमिव वर्षति क्षीणतारं चक्षुः, आरम्भश्च साहसानुवादी, नूनमसौ प्राणनिःस्पृहः किमपि कृच्छ्रं प्रियजनव्यसनमूलं प्रतिपत्स्यते । तत्पृच्छेयमेनम् । अस्ति चेन्ममापि कोऽपि साहाय्यदानावकाशस्तमेनमभ्युपेत्येत्यपृच्छम्—'भद्र, सन्नाहोऽयं साहसमवगमयति । न चेद् गोप्यमिच्छामि श्रोतुं शोकहेतुम्' इति । कश्चित्करवीरतले मया सह निषण्णः कथामकार्षीत—"महाभाग, सोऽहमस्मि पूर्वेषु कामचरः पूर्णभद्रोनाम गृहपतिपुत्रः । प्रयत्नसंवर्धितोऽपि पित्रा दैवच्छन्दानुवर्ती चौर्यवृत्तिरासम् । अथास्यां काशीपुर्यामार्यवर्यस्य कस्यचिद्गृहे चोरयित्वा रूपाभिग्राहितो बद्धः । वध्ये च मयि मत्तहस्तीमृत्युविजयो नाम हिंसाविहारी राजगोपुरोपरितलाधिरूढस्य पश्यतः कामपालनाम्न उत्तमामात्यस्य शासनाज्जनकण्ठरवद्विगुणितघण्टारवो मण्डलितहस्तकाण्डः समभ्यधावत् । अभिपत्य च मया निर्भयेन निर्भर्त्सितः परिणमन्दारुखण्डसुषिरानुप्रविष्टोभयभुजदण्डघटितप्रतिमानो भीतवन्न्यवर्तिष्ट । भूयश्च नेत्रा जातसंरम्भेण निकामदारुणैर्वागङ्कुशपादपातैरभिमुखीकृतः । मयापि द्विगुणाबद्धमन्युना निर्भर्त्स्याभिहतो निवृत्यापाद्रवत् । अथ मयोपेत्य सरभसमाक्रुष्टो रुष्टश्च

यन्ता 'हन्त, मृतोऽसि कुञ्जरापसद' इति निशितेन वारणेन वारण मुहुर्मुहुरभिन्नन्निर्याणभागे कथमपि मदभिमुखमकरोत्। अथावोचम—'अपसरतु द्विपकीट एष। अन्य कश्चिन्मातङ्गपतिरानीयताम्। येनाह मुहूर्त विहृत्य गच्छामि गन्तव्या गतिम्' इति। दृष्ट्वैव स मां रुष्टमुद्गर्जन्तमुत्क्रान्तयन्तृनिष्ठुराङ्ग पलायिष्ट। मन्त्रिणा पुनरहमाहूयाभिहित —'भद्र, मृत्युरेवैष मृत्युविजयो नाम हिंसाविहारी। सोऽयमपि तावत्त्वयैवभूत कृत। नद्विरम्य कर्मणोऽस्मान्मलीमसात्किमलमसि प्रतिपद्यास्मानार्यवृत्त्या वर्तितुम' इति। 'यथाज्ञापितोऽस्मि' इति विज्ञापितोऽथ मया मित्रवन्मय्यवर्तिष्ट।

——

शारदो शोभा

विनम्रशालिप्रसवौघशालिनीरपेतपङ्का ससरोरुहाम्भस।
ननन्द पश्यन्नुपसीम स स्थलीरुपायनीभूतशरद्गुणश्रिय ॥
निरीक्ष्यमाणा इव विस्मयाकुलै पयोभिरुन्मीलितपद्मलोचनै।
हृतप्रियादृष्टिविलासविभ्रमा मनोऽस्य जह्रु शफरीविवृत्तय ॥
तुतोष पश्यन्कलमस्य सोऽधिक सवारिजे वारिणि रामणीयकम।
सुदुर्लभे नार्हति कोऽभिनन्दितु प्रकर्षलक्ष्मीमनुरूपसगमे ॥
नुनोद तस्य स्थलपद्मिनीगत वितर्कमाविष्कृतफेनसतति।
अवाप्तकिञ्जल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहत पय ॥
कृतोर्मिरेख शिथिलत्वमायता शनै शनै शान्तरयेण वारिणा।
निरीक्ष्य रेमे स समुद्रयोपिता तरङ्गितक्षौमविपाण्डुसैकतम ॥
गतान्पशूना सहजन्मबन्धुता गृहाश्रय प्रेम वनेषु बिभ्रत।
ददर्श गोपानुपधेनु पाण्डव कृतानुकारानिव गोभिरार्जवे ॥

पपात पूर्वां जहतो विजिह्मतां वृषोपभुक्तान्तिकसस्यसंपदः ।
रथाङ्गसीमन्तितसान्द्रकर्दमान् प्रसक्तसंपातपृथक्कृतान् पथः ॥

जनैरुपग्राममनिन्द्यकर्मभिर्विविक्तभावेङ्गितभूषणैर्वृताः ।
भृशं ददर्शाश्रममण्डपोपमाः सपुष्पहासाः स निवेशवीरुधः ॥

ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषम् ।
उवाच यक्षस्तमचोदितोऽपि गां न हीङ्गितज्ञोऽवसरेऽवसीदति ।

इयं शिवाया नियतेरिवायतिः कृतार्थयन्ती जगतः फलैः क्रियाः ।
जयश्रियं पार्थ ! पृथूकरोतु ते शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥

उपैति सस्यं परिणामरम्यता नदीरनौद्धत्यमपङ्कता महीम् ।
नवैर्गुणैः संप्रति संस्तवास्थिरं तिरोहितं प्रेम घनागमश्रियः ॥

पतन्ति नास्मिन्विशदाः पतत्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः ।
तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणम् ॥

विहाय वाञ्छामुदिते मदात्ययादरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥

अमी पृथुस्तम्बभृतः पिशङ्गतां गता विपाकेन फलस्य शालयः ।
विकासि वप्राम्भसि गन्धसूचितं नमन्ति निघ्रातुमिवासितोत्पलम् ॥

विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपङ्क्तयः ।
असक्तमूधांसि पयः क्षरन्त्यमूरुपायनानीव नयन्ति धेनवः ॥

जगत्प्रसूतिर्जगदेकपावनी व्रजोपकण्ठं तनयैरुपेयुषी ।
द्युतिं समग्रां समितिर्गवामसावुपैति मन्त्रैरिव संहिताहुतिः ॥

कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने ।
इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदम्बकम् ॥

मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य बिभ्रती ।
शुकावलिर्व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदोऽनुगच्छति ॥

अथ काव्यपुरुषोत्पत्तिः

एव गुरुभ्यो गिर पुण्या पुराणी श्रृणुम स्म, यत्किल धिषणं शिष्याः कथाप्रसङ्गे पप्रच्छु , कीदृश पुनरसौ सारस्वतेय काव्यपुरुषो वो गुरुः ? इति । स तान् बृहताम्पतिरूचे ।

पुरा पुत्रीयन्ती सरस्वती तुषारगिरौ तपस्यामास प्रीतेन मनसा ता विरिञ्च प्रोवाच, पुत्र ते सृजामि । अथैषा काव्यपुरुष सुषुवे । सोऽभ्युत्थाय सपादोपग्रह छन्दस्वतीं वाचमुदचीचरत् ।

"यदेतद्वाङ्मय विश्वमर्थमूर्त्या विवर्त्तते ।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ ॥"

तामाम्नायदृष्टचरीमुपलभ्य भाषाविषये छन्दोमुद्रा देवी ससम्मदमङ्कपर्यङ्केनादाय तमुदलापयत् । "वत्स ! सच्छन्दस्काया गिर प्रणेत ! वाङ्मयमातरमपि मातर मा विजयसे प्रशस्यतम चेदमुदाहरन्ति यदुत 'पुत्रात्पराजयो द्वितीय पुत्रजन्म' इति । त्वत्त पूर्वे हि विद्वांसो गद्य ददृशुर्न पद्यम् । त्वदुपज्ञमथात छन्दस्वद्वच प्रवर्त्स्यति । अहो श्लाघनीयोऽसि । शब्दार्थौ ते शरीर, सस्कृत मुख, प्राकृत बाहु., जघनमपभ्रश , पैशाच पादौ, उरो मिश्रम् । सम प्रसन्नो मधुर उदार ओजस्वी चासि । उक्तिचण ते वचो, रस आत्मा, रोमाणि छन्दासि, अनुप्रासोपमादयश्च त्वामलङ्कुर्वन्ति । "तथापि सवृणु प्रगल्भस्य पुस कर्म, बालोचित चेष्टस्व" इति निगद्य निवेश्य चैनमनोकहाश्रयिणि गण्डशैलतलतल्पे स्नातुमभ्रगङ्गा जगाम । तावच्च कुशान् समिधश्च समाहर्तुं नि.सृतो महामुनिरुशना., परिवृत्ते पूषण्युष्मोपप्लुत तमद्राक्षीत् । कस्यायमनाथो बाल इति चिन्तयन्स्वमाश्रमपदमनैषीत । क्षणाच्चाश्वस्तश्च स सारस्वतेयस्तस्मै छन्दस्वतीं वाच समचारयत् । अकस्माद्विस्मापयन्स चाभ्युवाच ।

"या दुग्धाऽपि न दुग्धेव कविदोग्धृभिरन्वहम् ।
हृदि न सन्निधत्तां सा सूक्तिधेनु सरस्वती ॥"

तत्पूर्वकमध्येतृणा च सुमेधस्त्वमादिदेश। तत प्रभृति तमुशनस सन्त कविरित्याचक्षते। तदुपचाराच्च कवय इति लोकयात्रा। कविशब्दश्च कवृवर्ण इत्यस्य धातो काव्यकर्मणो रूपम्। काव्यैकरूपत्वाच्च सारस्वतेयेऽपि काव्यपुरुष इति भक्त्या प्रयुञ्जते। ततश्च विनिवृत्ता वाग्देवी तत्र पुत्रमपश्यन्ती मध्ये हृदय चक्रन्द। प्रसङ्गागतश्च वाल्मीकिर्मुनिवृषा सप्रश्रय तमुदन्तमुदाहृत्य भगवत्यै भृगुसूतेराश्रमपदमदर्शयत्। सापि प्रस्नुतपयोधरा पुत्रायाङ्कपालीं ददाना शिरसि च चुम्बन्ती स्वस्तिमता चेतसा प्राचेतसायाऽपि महर्षये निभृत सच्छन्दासि वचासि प्रायच्छत्। अनुप्रेषितश्च स तया निषादनिहतसहचरीक क्रौञ्चयुवान करुणक्रेङ्कारया गिरा, क्रन्दन्तमुदीक्ष्य शोकवान् श्लोकमुज्जगाद।

"मा निषाद! प्रतिष्ठा त्वमगम शाश्वती समा।
यत्क्रौञ्चमिथुनादेकमवधी काममोहितम्॥"

ततो दिव्यदृष्टिर्देवी तस्मा अपि श्लोकाय वरमदात्, यदुतान्यदवीयानो य प्रथममेनमध्येष्यते स सारस्वत कवि सपत्स्यत इति। स तु महामुनि प्रवृत्तवचनो रामायणमितिहास समदृभत्, द्वैपायनस्तु श्लोकप्रथमाध्यायी तत्प्रभावेन शतसाहस्रीं सहिता भारतम्।

ऋतु-वर्णना

वसन्तः

कुसुमजन्म ततो नवपल्लवा,
तदनु षट्पदकोकिल-कूजितम्।
इति यथाक्रममाविरभून्मधु,
द्रुमवतीमवतीर्य वनस्थलीम्॥

न तज्जल यन्न सुचारु पङ्कज,
न पङ्कज तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो,
न गुञ्जित तन्न जहार यन्मन ॥

ग्रीष्मः

प्रचण्डसूर्य स्पृहणीयचन्द्रमा,
सदावगाहक्षतवारिसञ्चय ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो,
निदाघकालोऽयमुपागत प्रिये ॥

सुभगसलिलावगाहा
पाटलससर्गसुरभिवनवाता ।
प्रच्छाय सुलभनिद्रा,
दिवसा परिणामरमणीया ॥

वर्षा

चलद्बलाकादशनाभिराम,
परिस्रवद्वारिमदाम्बुधार ।
आहन्यमानस्तडिदङ्कुशेन,
समम्य दन्त्रात घनद्विपेन्द्र ॥

मुदित इव कदम्बैर्जातपुष्पै समन्तात्
पवनचलितशाखै शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभि केतकीना
नवसलिलनिषेकाच्छान्ततापो वनान्त ॥

शरद्

हंसश्चन्द्र इवाभाति जल व्योमतल यथा।
विमला. कुमुदानीव तारका शरदागमे ॥
काशैर्मही, शिशिरदीधितिना रजन्य. ,
हसैर्जलानि सरिता, कुमुदै सरासि।
सप्तच्छदै कुसुमभारनतैर्वनान्ता ,
शुक्लीकृतान्युपवनानि च मालतीभि ॥

हेमन्तः

नवप्रवालोद्गमपुष्परम्य ,
प्रफुल्ललोध्र परिपक्वशालि ।
विलीनपद्म प्रपतत्तुषार ,
हेमन्तकाल समुपागतोऽयम् ॥
हे हेमन्त । स्मरिष्यामि त्वय्यतीते गुणद्वयम् ।
अयत्नशीतल वारि, निशाश्चाध्ययनक्षमा ॥

शिशिरः

न चन्दन चन्द्रमरीचिशीतल ,
न हर्म्यपृष्ठ शरदिन्दुनिर्मलम् ।
न वायव मान्द्रतुपारशीतला ,
जनस्य चित्त रमयन्ति साम्प्रतम् ॥

बुद्धस्यौदार्यम्

बोधिसत्त्व किल भगवान् स्वधर्माभिरतिपरे महति ब्राह्मणकुले जन्मपरिग्रहं चकार। स कृतजातकर्मादिसंस्कार प्रकृतिमेधावित्वाद् ज्ञानकौतूहलात् न चिरेणैव अष्टादशसु विद्यास्थानेषु सर्वासु च कलासु चाचार्यक पदमवाप। स कामेषु बहुदोषजात दृष्ट्वा कश्चिद्वनप्रस्थमलञ्चकार। तस्य प्रशमेन व्यालमृगादय निवृत्तपरस्परद्रोहा तपस्विवद् विचेरु। त प्रव्रजित श्रुत्वा तदीयैर्गुणैरववद्धचित्ता मनुष्या बन्धून् परिग्रहाश्च विहाय तच्छिष्यतामुपजग्मु।

अथ कदाचित्स महात्मा अजितनाम्ना शिष्येणानुगम्यमानो योगानुकूलान् पर्वतदरीनिकुञ्जान् अनुविचचार। गिरिगह्वरे प्रसूतिक्लेशैर्मन्दगतिकां, परिक्षामेक्षणां, क्षुधाकृशोदरीम्, सद्योजातान् बालान् अपि आहारमिव पश्यन्तीं, व्याघ्रवनिता ददर्श। बोधिसत्त्वस्तु तां दृष्ट्वा महीकम्पादद्रिराडिव करुणावशाच्चकम्पे।

अथ स बोधिसत्त्व शिष्यमुवाच—"वत्स पश्य, संसारनैर्गुण्यं, यदेषा व्याघ्री क्षुधालङ्घितस्नेहमर्यादा स्वशावकानपि भोक्तुमिच्छति। अहो बत, अतिरौद्रोऽयमात्मस्नेहो येन माताऽपि तनयान् भक्षयितुमिच्छति। तच्छीघ्र क्रियताम प्रयत्न अस्या क्षुध निवारणाय। यावत् न तनयानात्मान चोपहन्ति। अहमपि च प्रयतिष्ये साहसादस्मादेना निवारयितुम्" इति। तथेति प्रतिश्रुत्य स प्रक्रान्तस्तदाहारान्वेषणपरश्च बभूव।

अथ बोधिसत्त्वस्त शिष्यमेव सप्रेष्य चिन्तामापेदे। सकलेऽपि शरीरे विद्यमाने किमित्यह परस्मात् मास मृगये। न स विचक्षणो य सारहीने, दु खमये, सततशुचौ च देहे परस्मा उपयुज्यमाने प्रीतिमान् न स्यात्। तस्मात् पटप्रपातोद्गतजीवितेन शरीरेण व्याघ्रया शावकाना च सरक्षण करिष्यामि। 'कदा नु स्वगात्रैरपि परेषा हित कुर्याम' इति यो मे मनोरथोऽभूत्सोऽधुना सफलीभवति।

एवं स निश्चित्य देवतानामपि मनांसि विस्मापयन् स्वां तनुमुत्ससर्ज। अथ सा व्याघ्री बोधिसत्त्वशरीरनिपातशब्देन समुत्थापितकौतूहला विरम्य स्वतनयवैशसात् तस्यां दिशि नयने चिक्षेप। दृष्ट्वा च बोधिसत्त्वशरीरमुद्गतप्राणं सहसाभिसृत्य भक्षयितुमुपचक्रमे। तस्य शिष्यो मांसमनासाद्यैव प्रतिनिवृत्त 'कुत्रोपाध्याय' इति विलोकयन् बोधिसत्त्वशरीरमुद्गतप्राणं व्याघ्र्या भक्ष्यमाणं ददर्श। स तत्कर्मातिशयविस्मयात् प्रतिव्यूढशोकदुःखावेग आत्मगतमिदमुवाच, 'अहो अस्य महात्मनो दुःखितजने दया स्वसौख्ये निःसङ्गता च। सर्वथा नमोऽस्त्वस्मै महाभागाय सर्वभूतशरण्याय अतिविपुलकारुण्याय अप्रमेयसत्त्वाय इति।

नल-हंसयोः कथा

विधाय मूर्तिं कपटेन वामनीं स्वयं बलिध्वंसिविडम्बिनीमयम्।
उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं समधत्त पाणिना॥
तदात्तमात्मानमवेत्य सम्भ्रमात् पुनः पुनः प्रायसदुत्प्लवाय सः।
गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलम्॥
ससम्भ्रमोत्पातिपतत्कुलाकुलं सरः प्रपद्योत्कतयानुकम्पताम्।
तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव॥
पतत्रिणा तद्रुचिरेण वञ्चितं श्रियः प्रयान्त्या प्रविहाय पल्वलम्।
चलत्पदाम्भोरुहनूपुरोपमा चुकूज कूले कलहंसमण्डली॥
न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग यस्याः पतिरुज्झितस्थितिः।
इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु॥
न जातरूपच्छदजातरूपता द्विजस्य दृष्टेयमिति स्तुवन्मुहुः।
अवादि तेनाथ स मानसौकसा जनाधिनाथः करपञ्जरस्पृशा॥
धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः।
तवार्णवस्येव तुषारसीकरैर्भवेदमीभिः कमलोदयः कियान्॥

न केवल प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मन ।
विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि ॥
पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥
फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः ।
त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी घृणीयते ॥
इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः ।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥
मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे ! त्वां करुणा रुणद्धि न ॥
मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः ! सुतशोकसागरः ॥
मदर्थसंदेशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते ।
विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये स कीदृग्भविता तव क्षणः ॥
कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटंतपनिष्ठुराक्षरा ॥
अपि स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं वतोदिता ।
मुखानि लोलाक्षि दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि ॥
ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि ! विपद्यते यदि ।
तदास्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः ॥
तवापि हाहा विरहात्क्षुधाकुला कुलायकूलेषु विलुठ्य तेषु ते ।
चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनास्फुटितेक्षणा मम ॥
सुताः कमाहूय चिराय चूङ्कृतैर्विधाय कम्प्राणि मुखानि कं प्रति ।
कथासु शिष्यध्वमिति प्रमील्य स स्रुतस्य सेकाद्बुबुधे नृपाश्रुणः ॥
इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयावनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय ॥

—

वञ्चक-चरित्रम्

आसीद् गोदावरीतीरे विशाला नाम नगरी। तस्या च समुद्रसेनाभिधानो राजा बभूव। तस्य पुत्र चन्द्रसेननामान शुद्धहृदय दृष्ट्वा तन्नगरवासिना वञ्चकेन निजमतानुसारिणा वणिजा चिन्तितम् यत —

शार्दूलस्य मृगा भक्ष्या नागा इव गरुत्मत ।
असाधो साधवो भक्ष्या श्येनस्येवेतरे खगा ॥

तदयं कुमार साधुप्रकृतिर्मम निश्चित सुखग्राह्यधनो भविष्यति तदेन मुपसर्पामिति परामृश्य स त राजकुमार सिषेवे। गुञ्जाफलप्राया दुर्जनस्य प्रकृति परिणामविरसाऽप्यापत्सुरसा भवति तथा प्रकृत्या त कुमार सेवमान, सेवया वश नीतवान्। ततो वञ्चकश्चिन्तयामास। यदेन केनाप्युपायेन देशान्तर नीत्वाऽस्य द्वारा राजकोपसारभूतानि रत्नानि हरामि। ततश्च विश्रम्भप्रस्तावे कुतूहलप्रस्तावे च देशान्तरकथा श्रवणरमणीया मुहुर्मुहु कथयति। तत्कथाश्रवणरसिक कुमार विदित्वा वणिगुवाच, कुमार! राज्ये वर्तमानस्य भवतो नित्यसुलभैरप्युपभुक्तैरेव भोग्यवस्तुभि कुत सुखम्? सुखन्तु देशान्तरे सभवति यत् प्रत्यहमदृष्टदर्शनमभुक्तभोजनमननुभूतानुभवश्च जायते।

चन्द्रसेन उवाच, सखे! महती ममोत्कण्ठा वर्तते कथ देशान्तराणि दृश्यताम्। वणिगुवाच, कुमार! भारलघुना गुरुमूल्येन धनेन निर्वहति देशान्तरगमनम्। यदि मन स्थिर भवति, धनं राजकुमारस्य विद्यत एव। तदा मन पर स्थिरीक्रियताम् राजकुमारेण। कुमारोऽवदत् सखे मनस्थैर्य कृतम्। वञ्चको ब्रूते, यदि कथेयमन्यकर्णपथगामिनी परतर्कविषया च न भवति तदा निर्वहति कार्यम्। कुमार आह, न तर्कणीय केनापि। ततस्तथा देशान्तराभिलाष कुमार तथाविधधनसमेत आखेटकव्याजेन नीत्वा चलित स वणिक्। कियतो दूरात् सैन्य परावर्त्य वराश्वावरूढौ द्वावेतौ काचिद्दिशमुद्दिश्य जग्मतु ततो दूरगमनपरिश्रान्तौ क्षुत्पिपासापराभूतौ क्वचिदरण्ये जलाशयसन्निधाने महावृक्षमेक ददृशतु। तस्यच्छायायां द्वावपि तुरङ्गादवतेरतु।

कुमारस्तु कृतजलपान. परमसुखी छायामासाद्य तृणशय्याया निद्राणो बभूव। त निद्राण दृष्ट्वा वञ्चकेन चिन्तितं यन्मम कृत्यस्यायमेवावसर। तत पादसवाहन कुर्वाणेन दुरात्मना कुमारस्य निद्रा निरूपिता। तं गाढनिद्रं विदित्वा लताभिर्बबन्ध। तदनन्तर लताबद्धसर्वगात्रस्य तस्य हृदयमारुह्य शस्त्रमादाय मनसा विचारयामास। जीववधो न भवेत् स्वकार्यसिद्धि कथं स्यात्। तदेनमन्ध विधाय निजप्रयोजन साधयामीति निश्चित्य चक्षुषी स्फोटयामास। यावत् कुमार सखे! परित्रायस्वेति वदति तावदसौ कृतकर्मा धन तुरगञ्चादाय पलायित। कुमारस्तु तत्रारण्ये कृतार्तनादो रुरोद। रुदश्चक्षुर्वेदनया निर्दयनिक्षिप्तहस्तस्य तस्य पादस्त्रुटितबन्धो बभूव। परिश्रान्तो निस्सहो निष्क्रियश्च भूमौ निपपात।

तत्र वृक्षे दयालुर्नाम वृद्धशुक कश्चिद्वसति। तस्य द्वौ पुत्रौ महाशुकौ सञ्चरणासमर्थस्य प्रत्यहमाहारमानीयानीय पितृ-भक्त्या प्रयच्छत। तदा च तौ त वृद्धशुक पितर भोजयित्वा कथयामासतु। पितरावाभ्या नर्मदातीरे महदपूर्वकष्टस्थान दृष्टम्। वृद्धशुक उवाच, कि तदपूर्व किंवा कष्टस्थानञ्च दृष्टम्। महाशुकौ कथयत यूथिकापुरनाम्नि नगरे नीलरथभूपालस्य एक एव चित्ररथनामधेय कुमार। स चान्धो वैद्यजन-सेव्यमानोऽप्यन्धता न मुञ्चति। तेन राज्ञो निर्दीप गृहमिव तद्राज्य महत्कष्टस्थान दृष्टमावाभ्याम्। वृद्धशुक उवाच, पुत्रौ! नष्टचक्षुपश्च-क्षुर्बलाय भेपज वर्तते। तौ भेपजञ्च जानीत। तावूचतु कि तद् भेपजम्। वृद्धशुक कथयति एतस्यैव तरो कुसुमेन शुष्केण आर्द्रेण वा यद्यञ्जनं क्रियत तदा नष्टचक्षुश्चक्षुष्मान् भवति। तदाकर्ण्य कुमारश्चि-न्तयामास, अहो विधिरनुकूलो दृश्यत। यत् विहगालापनेऽपि चक्षुर्भे-षजप्रस्तावना जाता। भेपजमपि सुलभमिदानीम्। तदस्य वृक्षस्य पुष्पेण चक्षुरञ्जनमाचरामि। एव निश्चित्य राजकुमारेण तथैव कृतम्। तत प्रथमाञ्जनेन चक्षुर्वेदना शान्ता, द्वितीयाञ्जनेन दृष्टि स्वच्छा जाता, तृतीयाञ्जनेन प्रकृष्टा दृष्टिर्बभूव। तत परमहृष्ट कुमारश्चिन्तयामास। यदिदानीमसन्मैत्री जाता, विपत्तिस्तीर्णा। अग्रे कि विधेयमस्ति। अनया दुर्दशया यदि पुनर्गृहं गम्यत तदान्येपामुपहासस्थानम्।

आत्मनश्च कार्पण्यं मरणादपि निन्दितम्, अतो गृहं न गमिष्यामि। वरञ्चोपलब्धानुभवमिदमेव भेषजं नीत्वा यूथिकापुरं गच्छामि। तं चित्ररथं राजकुमारं सलोचनं करवाणि। तेनैव तस्य पिता नीलरथो मम कामनां पूरयिष्यतीति परामृश्य भेषजमादाय स कुमारः पन्थानं पृच्छन् कियतापि कालेन यूथिकापुरं जगाम। नीलरथस्य दर्शनं विधाय तत्पुत्रं चित्ररथं चक्षुष्मन्तं चकार। नीलरथस्तु परितुष्टः सर्वं तस्योदन्तं परिपृच्छति स्म। तस्य कथया गुणेन शीलेन च तदीयं कुलं ज्ञात्वा चित्ररथ. कनीयसीं चित्रसेनानाम्नीं स्वदुहितरं विवाहविधिना राज्यचतुर्थभागसमेतां तस्मै ददौ। ततः प्रभृति चन्द्रसेनश्चन्द्राननया चित्रसेनया प्रियया सह निष्कण्टकं राज्यसुखमनुभवति।

एकदा कस्मिन्नप्युत्सवसमये स चन्द्रसेनो राज्ञो नीलरथस्य श्वशुरस्य आगारं गच्छन्नकस्मात्पथि तं वञ्चकं वणिजमागच्छन्तं ददर्श। दृष्ट्वा च तुरङ्गादवतीर्य तमालिलिङ्ग। वञ्चकस्तु तं दृष्ट्वा कथमत्रापि स एव कुमार इति पलायाम्बभूव। पलायमानं तं पदातिभिरानीय कुमारस्तं वणिजमालिङ्ग्य मित्रलाभपरितुष्टो राजकुलगमनं परिहृत्य तेन वणिजा सह निजं गृहमागत्य रहस्युपविष्टः। कुमार उवाच मित्र! कथय वार्ताम्। तथालब्धधनोऽपि कथमित्थं दुःखस्थोऽसि। वणिगुवाच, स्वकर्मफलपरिणामेन। सोऽवदत्, विस्मर तत् अन्यत्कथय कथं दुर्बलोऽसि? वणिगाह, कुमार वणिगहं स्वभावाल्लुब्धः तेन भवदीयधनेन वाणिज्यार्थं वहित्रमारुह्य समुद्रपारं गतोऽस्मि, तत्र बहुगुणं वाणिज्यमभूत्। तस्मादागच्छतो मम तटनिकटे समुद्रे वहित्रं निममज्ज, धनानि नष्टानि, प्राणावशेषोऽहमागतोऽस्मि, ततः प्राणान्मम सापराधस्य गृह्णातु कुमारः। चन्द्रसेन उवाच, मित्र! न भेतव्यम्, त्वं मम मित्रमसि, यावज्जीवं हि परिपालनीया सतां मैत्री। वित्तं विनष्टमिति तत्राधिकां चिन्तां मा कुरु, तदधिकमपरं वित्तं दास्यामि। वणिगुवाच कुमार! नेदं प्रत्येति स्वापराधमुपितं मे हृदयम्। यतो मम न कोऽपि त्वयि मित्रानुरूपो व्यवहारः। कथं पुनः प्रसीदति भवान्? चन्द्रसेन आह, ममायत्तं मत्कर्म। भवतः कृतरहं तुष्टः। एतच्च श्रुत्वा लज्जाविदीर्णहृदयो वञ्चकः पञ्चत्वं जगाम।

कुमारस्तन्मरणादुःखेन सुतरां रुरोद। रुदन्तं स्वामिनमवलोक्य चित्रसेनाऽब्रवीत् कोऽयं कुत आगतः कस्मान्मृतः कुतो भवानित्थं करुणाधीनो रोदिति? चन्द्रसेन उवाच, पुराऽनेन महत्युदारता कृता यतो धनापहारकेणापि स्वहस्तपतितोऽपि मूलघातं न हतोऽस्मि। चित्रसेनोवाच, नाथ! सोऽस्य प्रमादो, न तु ज्ञानपूर्वको व्यापारः। चन्द्रसेन आह, तथापि महानेवायं यतो लज्जया प्राणान् परितत्याज। ततः कुमारस्तस्य वणिजस्तत्सजातीयद्वारा दैहिकमन्त्येष्टिसंस्कारं कारितवान्। वञ्चकस्तु तथापि निजव्यापाराद् ऐहिकमयशः पारलौकिकञ्च नरकमाससाद।

विक्रमादित्य-बाल्य-वर्णनम्

स विक्रमेणाद्भुततेजसा च चेष्टाविशेषानुमितेन बालः।
श्रीविक्रमादित्य इति क्षितीन्दोरवाप विख्यातगुणः समाख्याम्॥

देवस्य चालुक्यविभूषणस्य भार्या यशोरञ्जितदिङ्मुखेन।
तेनावदातद्युतिना रराज साम्राज्यलक्ष्मीरिव विक्रमेण॥

आलम्ब्य हारं करपल्लवेन पयोधरं पातुमसौ प्रवृत्तः।
भोगेष्ववाणी गुणिनो ममेति स्वभावमात्मीयमवाप्यवत्त॥

त्यक्त्वोपविष्टानन्यदसौ कुमारः समुत्थितानां सविधे जगाम।
आगामि तेनाधिकमुन्नतात्मा नीचेषु वैमुख्यमिवाचचक्षे॥

धात्रेयिकायाः स्मितपूर्वकं यद्दत्तं हुङ्कारमसौ कुमारः।
अपूरयत्तेन नृपस्य कर्णौ पीयूषगण्डूषपरम्पराभिः॥

यदुत्थितः साङ्गुलिसंग्रहेण यत्किंचिदव्यक्तमवोचतापि।
अभङ्क्ष्णमक्ष्णोः श्रवसोश्च तेन समापतेः श्रवनेन बभूव॥

उत्सङ्गमारुह्य नरेश्वरस्य स पांसुलीलारसधूसराङ्गः।
निजाङ्गसङ्गलितैः परागैश्चक्रे मनः कार्मणचूर्णयोगम्॥

राज्ञां प्रणामाञ्जलिसम्पुटेषु किमप्यवज्ञामुकुलीकृताक्ष ।
तस्यैकहस्ताम्बुरुहप्रणामे कृतार्थमात्मानममस्त देव ॥

प्रतिक्षण कुन्तलपार्थिवस्य वितन्वतस्तन्मुखचुम्बनानि ।
तदीयदन्तच्छदजन्मनेव रागेण चेत' परिपूर्णमासीत् ॥

मुखेन्दुसचारकृताभिलापकुरङ्गभीत्यर्थमिवार्पितेन ।
कण्ठावसक्तेन स राजसूनुरराजत व्याघ्रनखाङ्कुरेण ॥

क्रीडन्समुत्सारितवारनारीमञ्जीरनादागतराजहस ।
एक क्षिते पालयिता भविष्यन्स राजहसासहनत्वमूचे ॥

स पीडयन्नायसपञ्जरस्थान् क्रीडापर' केशरिणा किशोरान् ।
समाददे भाविरिपुद्विपेन्द्रयुद्धोपयोगीव तदीयशौर्यम् ॥

प्रासोदय पादनखैश्चकासे स बालचन्द्र परिवर्धमान ।
अभ्यर्थ्यमान सह खेलनाय बालैरपत्यैरिव शीतरश्मे ॥

परा प्रतिष्ठां लिपिषु क्रमेण जगाम सर्वासु नरेन्द्रसूनु ।
पुण्यात्मनामत्र तथाविधाना निमित्तमात्र गुरवो भवन्ति ॥

भक्ताम्बरीष-प्रताप:

आसीदशेषगुणवशीकृतजनमानस विष्णुभक्तिपरायण अम्बरीषोनाम कश्चिन्नृपति ।

विद्यया शीलेन विश्वजनीनप्रेम्णा च तस्मिन्ननुरक्ता प्रकृतय सुख मूषु । निरन्तरमसौ तद्गतेन चेतसा भगवन्नामकीर्त्तयन् कृतार्थमात्मान मन्यते स्म ।

स हि भगवच्चरणयोर्मन तद्गुणवर्णने वाच, तत्कथाश्रवणे कर्णौ, तन्मूर्त्तिदर्शने दृशौ, तद्गृहमार्जने करौ, तत्पुण्यालयगमने च पादौ, नियुज्य परा प्रीतिमवाप ।

कालेन परिणते भगवदनुरागे तेनैवामोमतृप्तिमनुभवन् विरसविषयेषु वीतरागोऽस्य समजनि ।

अपास्तसकलराजकर्म्मणस्तदेकतानचेतसस्तस्य रक्षणाय भक्तवत्सलेन भगवता चक्रास्त्रं नियोजितम् ।

ततोऽस्य भगवत्प्रीतये भार्य्यासमेत संवत्सरसाध्य द्वादशीव्रतमनुतस्थौ । समाप्ते च तस्मिन् यदासौ पारणाय मनश्चक्रे, तदैव सुलभकोपो मुनिर्दुर्वासा अतिथिधर्मेण समायात ।

तञ्चाय "धन्योऽस्मि यद्भवत्समार्यस्य पादरजसा पवित्रीकृतम्" इत्यभिदधत् प्रत्युत्थानादिभि सम्मानितवान् ।

स च महर्षिर्माध्याह्निकोपासनार्थं कालिन्दीजलमुपेतश्चिरयति स्म । नृपतिस्तु निःशेषितप्रायायां द्वादश्याम् एकतो मुनेरतिक्रमणमपरत पारणाभङ्ग इत्युभयसङ्कटस्थ कर्त्तव्यविमूढो विदुषामुपदेशमाचकाङ्क्ष । पारणानुरोधान्मुनिमतिक्रम्य जलपानमविरुद्धमिति तैरुपदिष्ट कुशाग्रेण च जल पपौ ।

अथ समापितमाध्याह्निकोपासनो दुर्वासा राजसमीपमागतस्तपोबलेन राज्ञश्चेष्टितमवगम्य, ज्वलन्निवामर्षानलेन, निर्गमयन्निव चक्षुष जगद्दाहक तेज, उन्मूलयन्निव सृष्टिप्रपञ्चमलौकिक्या शक्त्या, तेजसा ज्वलन्तीं सर्पिणीं विभीषिका स्वकीया जटामेकामुच्छिद्य राज्ञ अभिचाराय निचिक्षेप ।

सा तु गृहीतभीषणरूपा कालानलसन्निभा राजाभिमुख प्रतस्थे ।

अस्मिन्नन्तरे विष्णुचक्र कृतधारगर्जन सहसा स्वय तत्राविर्भूय राजाभिमुखमापतन्तीं ता शतधा विदार्य दुर्वाससमभिदुद्राव । स च भीतिविह्वल प्राणरक्षार्थं यत्र यत्र धावतस्तत्रतत्रैव स्वमनुधावत् विष्णुचक्रमपश्यत् ।

तत 'हा हतोऽस्मि क्व गच्छामि' एवमभिदधत् यथाक्रम स भूतलमन्तरिक्ष पाताल दुर्गकान्तार पर्वतनगरादि पर्यटन्नपि निष्कृतिमलभमान ब्रह्माण शरणमाप, "का शक्तिरस्माक विष्णुचक्रमवरोद्धुम्" इति तेनोपेक्षितश्च परम । सोऽपि "नाहमत्र प्रभवामि" तमुपेक्षितवान् ।

तस्मादनन्यशरणोऽसौ सकलजगदेकशरणं भगवन्तमधोक्षजमाशिश्राय। भगवानपि तामनुशशास यत् अस्य प्रतीकाराय नापरः कश्चित् प्रभवति तस्मादन्यः। तत्तमेव सर्वात्मना प्रसादयाम्बरीषं स हि कृतागसमपि त्वामचिरादुद्धरिष्यति अति कोमलं नाम भक्तहृदयं न जातु काठिन्यं भजते।

एवमनुशिष्टोऽसौ पुरुषोत्तमेन अनुतापानलदग्धमानसः, अम्बरीषमुपसृत्य तत्पादाववलम्बितवान्।

स तु पादस्पर्शविलज्जितो दुर्वाससमुत्थाप्य विष्णुचक्रं प्रसादयामास। ततः प्रशान्ते विष्णुचक्रे, प्रत्यावृत्तजीवन इव दुर्वासा इदमवोचत्—

भूपते! क्षमस्व मामसमीक्ष्यकारिणं मामवेहि मुनिवेशधारिणं श्वपचाधमम्। अयोग्यः किलायं जनः सर्वथामुनिनामधेयस्य। तापसजनोचितां क्षमामपहाय रोषकलुषितेन्द्रियः पतितोऽहं कृतार्थमिवात्मानं मन्ये त्वत्संसर्गात्।

इयन्ते शाश्वती कीर्त्तिश्चिरमुद्घोषयतु जगति भक्तजनमहिमानम्। एवमाभाष्य राजानमसावन्तर्दधे।

भर्तृहरि-श्लोकाः

स्वल्पं स्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं,
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं,
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम्॥
एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।

तेऽमी मानुषराक्षसा परहितं स्वार्थाय निघ्नन्ति ये,
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥

मनसि वचसि काये पुण्यपीयूषपूर्णा,
त्रिभुवनमुपकारश्रेणिभि प्रीणयन्त. ।
परगुणपरमाणून्पर्वतीकृत्य नित्य,
निजहृदि विकसन्त सन्ति सन्त कियन्त ॥

केयूरा न विभूषयन्ति पुरुष हारा न चन्द्रोज्ज्वला,
न स्नान न विलेपन न कुसुम नालङ्कृता मूर्द्धजा ।
वाण्येका समलङ्करोति कृतिनं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सतत वाग्भूषणम्भूषणम् ॥

नम्रत्वेनोन्नमन्त परगुणनुतिभि स्वान् गुणान् ख्यापयन्त,
स्वार्थान् सम्पादयन्तो विततपृथुतरारम्भयत्ना परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्मुखान् दूषयन्त,
सन्त साश्चर्यचर्या जगति बहुमता कस्य नाभ्यर्थनीया ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टान्दशा,
आपन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
उन्मत्तेभविभिन्नकुम्भकवलग्रासैकबद्धस्पृह,
किं जीर्णं तृणमत्ति मानमहतामग्रेसर केशरी ॥

जाड्य धियो हरति सिञ्चति वाचि सत्य,
मानोन्नतिं दिशति पापमपाकरोति ।
चेत प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गति कथय किं न करोति पुंसाम् ॥

कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्त न निर्दहति कोपकृशानुताप ।
कर्षन्ति भूरिविषयाश्च न लोभपाशा,
लोकत्रय जयति कृत्स्नमिद स धीर ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन,
दानेन पाणिर्न च कङ्कणेन ।
आभाति कायः करुणापराणां,
परोपकारेण न चन्दनेन ॥

विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतसिद्धमिदं हि महात्मनाम् ॥

कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वलोकस्य वा मूर्द्ध्नि विशीर्येत वनेऽथवा ॥

यक्ष-धर्मराज-वार्ता

द्यूते पराजितो धर्मराजयुधिष्ठिरः प्रतिपालयितुं प्रतिज्ञातं मात्रा कलत्रेण भ्रातृभिश्चसह वनं गतवान्। भ्रमणं विधाय वने ते निरतिशय पिपासया ग्लानिमापुः। तत्रानतिदूरे सरसः पानीयमानेतुं प्रथमं सहदेवो गतः। तत्र च तदा धर्म्मः परीक्षार्थमास्थाय बकरूपं यक्षः तमुवाच। भो जलार्थिन्! मत्कृतानां प्रश्नानां चतुर्णां विधायोत्तरं जलं पिब, स्नाहि, गच्छ, वा नोचेत् स्पृशेः जलं तदा म्रियेथाः। प्रश्नाश्चेमे—

"का च वार्त्ता? किमाश्चर्य्यं? कः पन्था? कश्च मोदते?।
ममैतांश्चतुरः प्रश्नान् कथयित्वा जलं पिब ॥"

तृषार्त्तस्तु सहदेवः तद्वचनमवज्ञाय यावत् जलं पपौ तावत् ममार च। एवं नकुलः, अर्ज्जुनः, भीमश्च तत्र गता मृताश्च।

चरमे तु युधिष्ठिरस्तत्र गत्वा महदत्याहितं दृष्टवान्। तमपि बकरूपो यक्षस्तथैवाप्राक्षीत्। तदाकर्ण्य बुद्धिमान् धार्मिकश्च युधिष्ठिर आह श्रूयतामुत्तरम्।

"मासर्तुदर्वी परिवर्त्तनेन सूर्य्याग्निना रात्रिदिवेन्धनेन।
अस्मिन् महामोहमये कटाहे भूतानि कालः पचतीति वार्त्ता॥"

"अहन्यहनि भूतानि गच्छन्ति यममन्दिरम्।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतः परम्॥"

"वेदा विभिन्नाः स्मृतयो विभिन्ना नासौ मुनिर्यस्य मतं न भिन्नम्।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्था॥"

"दिवसस्याष्टमे भागे शाकं पचति यो नरः।
अनृणी चाप्रवासी च स वारिचर! मोदते॥"

श्रुत्वैतद् युधिष्ठिरोत्तरं यक्षस्तुतोष, ते च पुनर्जीविता इति।

सामान्य-नीति-संग्रहः

प्रथमो गुम्फः

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि॥

अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयम्।
अहो सुमनसां प्रीतिर्वामदक्षिणयोः समा॥

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम्।
आपत्सु च महाशैलशिलासंघातकर्कशम्॥

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च॥

वरं हालाहलं पीतं सद्यः प्राणहरं विषम् ।
न तु दृष्टं धनान्धस्य भ्रूभङ्गकुटिलं मुखम् ॥

द्वाविमावम्भसि क्षेप्यौ दृढं बद्ध्वा गले शिलाम् ।
धनिनं चाप्रदातारं दरिद्रञ्चातपस्विनम् ॥

ग्रासादर्धमपि ग्रासमर्थिभ्यः किं न यच्छसि ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥

वेपथुर्मलिनं वक्त्रं दीना वाग् गद्गदः स्वरः ।
मरणे यानि चिह्नानि तानि चिह्नानि याचके ॥

आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ॥

ते धन्याः पुण्यभाजस्ते तैस्तीर्णः क्लेशसागरः ।
जगत्सम्मोहजननी यैराशाशीविषी जिता ॥

चलन्ति गिरयः कामं युगान्तपवनाहताः ।
कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ॥

बहवः पण्डिताः केऽपीह नराः शास्त्राण्यधीयते ।
विरलाः रिपुखड्गाग्रधारापातमहिष्णवः ॥

अगाधजलसंचारी न गर्वं याति रोहितः ।
अङ्गुष्ठोदकमात्रेण शफरी फुर्फुरायते ॥
मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥

गुरून् कुर्वन्ति ते वंश्यानन्वर्था तैर्वसुन्धरा ।
येषां यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम् ॥
गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः ।
वासुदेवं नमस्यन्ति वसुदेवं न मानवाः ॥

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

बहूनामल्पसाराणां समवायो दुरत्ययः ।
तृणैर्विधीयते रज्जुर्बध्यन्ते तेन दन्तिनः ॥

तापसीद्वारा राम-प्रवृत्ति-वर्णनम्

(नेपथ्ये) स्वागतं तपोधनायाः।

(ततः प्रविशत्यध्वगवेषा तापसी)

तापसी—अये ! वनदेवतेयं फलकुसुमपल्लवार्घ्येण मामुपतिष्ठते ।

(प्रविश्य)

वनदेवता—(अर्घ्यं विकीर्य)

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः,
सतां सद्भिः सङ्गः कथमपि च पुण्येन भवति ॥
तरुच्छाया तोयं यदपि तपसां योग्यमशनम्
फलं वा मूलं वा तदपि न पराधीनमिह वः ॥

तापसी—किमत्रोच्यते—

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः,
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ॥
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसम् ।
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥

(उपविशतः)

वनदेवता—कां पुनरत्रभवतीमवगच्छामि ।

तापसी—आत्रेय्यस्मि ।

वनदेवता—आर्ये आत्रेयि ! कुत पुनरिहागम्यते ? किंप्रयोजन वा दण्डकारण्यप्रचार ?

आत्रेयी—अस्मिन्नगस्त्यप्रमुखा प्रदेशे,
भूयाम उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तु निगमान्तविद्यां,
वाल्मीकिपार्श्वादिह पर्यटामि ॥

वनदेवता—यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिन प्राचेतसमृषि ब्रह्मपारायणायोपासते तत्कोऽयमार्याया दीर्घप्रवास प्रयास ?

आत्रेयी—तत्र महानध्ययनप्रत्यूह इत्येव दीर्घप्रवासोऽङ्गीकृत ।

वनदेवता—कीदृश ?

आत्रेयी—तस्य भगवत केनापि देवताविशेषेण सर्वप्रकाराद्भुत स्तन्यत्यागमात्रके वयसि वर्तमान दारकद्वयमुपनीतम् । तत्खलु न केवलमृगीणामपि तु चराचराणां भूतानामान्तराणि तत्त्वान्युपस्नेहयति।

वनदेवता—अपि तयोर्नाम सविज्ञानमस्ति ।

आत्रेयी—तयैव किल देवतया तयो कुशलवाविति नामनी प्रभावश्चाख्यात ।

वनदेवता—कीदृश प्रभाव ?

आत्रेयी—तयो किल सरहस्यानि जृम्भकास्त्राण्याजन्मसिद्धानि ।

वनदेवता—अहो नु भोश्चित्रमेतत् ।

आत्रेयी—तौ च भगवता वाल्मीकिना धात्रीकर्म वस्तुत परिगृह्य पोषितौ परिरक्षितौ च । निवृत्तचौलकर्मणोश्च तयोस्त्रयीवर्जमितरास्तिस्रो विद्या सावधानेन परिनिष्ठापिता । समनन्तरं च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयीविद्यामध्यापितौ । न ह्येताभ्यामतिप्रदीप्तप्रज्ञामेधाभ्यामस्मदादे महाध्ययनयोगोऽस्ति ।

यत —वितरति गुरु प्राज्ञे विद्या यथैव तथा जडे,
न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च पुनर्भूयान् भेद फल प्रति तद्यथा,
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदा चय ॥

वनदेवता—अयमसावध्ययनप्रत्यूह ।

आत्रेयी—अन्यच्च ।

वनदेवता—अथापर क ?

आत्रेयी—अथ स ब्रह्मर्षिरेकदा माध्यन्दिने सेवनाय नदीं तमसामनुप्रपन्न । तत्र युग्मचारिणो क्रौञ्चयोरेक व्याधेन विध्यमान ददर्श । आकस्मिकप्रत्यवभासा च दर्वीं वाचमव्यतिकीर्णवर्णाम आनुष्टुभेन छन्दसा परिणतामभ्युदैरयत् ।

मा निषाद प्रतिष्ठा त्वमगम शाश्वती समा ।
यत्क्रौञ्चमिथुनादेकमवधी काममोहितम ॥

वनदेवता—चित्रमाम्नायादन्यो नूतनश्छन्दसामवतार ।

आत्रेयी—तेन खलु पुन समयेन त भगवन्तमाविर्भूतशब्दब्रह्मप्रकाश मृषिमुपसगम्य भगवान् भूतभावन पद्मयोनिरवोचत् ऋषे । प्रबुद्धोऽसि वागात्मनि ब्रह्मणि तद् ब्रूहि रामचरितम् । अव्याहतज्योतिरार्ष ते प्रातिभ चक्षु । आद्य कविरसि—इत्युक्त्वाऽन्तर्हित । अथ स भगवान् प्राचेतस प्रथम मनुष्येषु शब्दब्रह्मणस्तादृश विवर्तमितिहास रामायण प्रणिनाय ।

वनदेवता—हन्त तर्हि पण्डित ससार ।

आत्रेयी—तस्मादवोच तत्र हि महान् अध्ययनप्रत्यूह इति ।

वनदेवता—युज्यते ।

आत्रेयी—विश्रान्तास्मि भद्रे । सम्प्रत्यगस्त्याश्रमस्य पन्थान ब्रूहि ।

वनदेवता—इत पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण ।

आत्रेयी—(सास्रम्) अप्येतत्तपोवनम् ? अप्येषा पञ्चवटी ? अपि सरिदियं गोदावरी ? अप्ययं गिरिः प्रस्रवणः ? अपि जनस्थान वनदेवता वासन्ती त्वम् ?

वनदेवता—अस्त्येतत् सर्वम् ।

आत्रेयी—हा वत्से जानकि !

स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानाम् ।
त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृष्टामिव न करोति ॥

वासन्ती—(सभयम्, स्वगतम्) कथं नामशेषामित्याह । (प्रकाशम्) आर्ये, किमत्याहितं सीतादेव्या ?

आत्रेयी—न केवलमत्याहितं सापवादमपि । (कर्णे) एवमेवम् ।

वासन्ती—अहह ! दारुणो दैवनिर्घातः । (इति मूर्च्छति) ।

आत्रेयी—भद्रे, समाश्वसिहि, समाश्वसिहि ।

वासन्ती—हा प्रियसखि ! हा महाभागे ! ईदृशस्ते निर्माणभागः । हा रामभद्र ! अथवाऽलं त्वया । आर्ये आत्रेयि ! अथ तस्मादरण्यात्परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः ?

आत्रेयी—नहि नहि ।

वासन्ती—हा कष्टम् ! अरुन्धतीवसिष्ठाधिष्ठितेषु जीवन्तीषु रघु कदम्बकेषु च प्रवृद्धासु राज्ञीषु कथमिदं जातम् ?

आत्रेयी—ऋष्यशृङ्गाश्रमे गुरुजनस्तदाऽऽसीत् । सम्प्रति तु परिसमाप्तं तद्द्वादशवार्षिकं सत्रम् । ऋष्यशृङ्गेण च सम्पूज्य विसर्जिता गुरवः । ततो भगवत्यरुन्धती नाहं वधूविरहितामयोध्यां गमिष्यामीत्याह । तदेव राममातृभिरनुमोदितम् । तदनुरोधाद्भगवतो वसिष्ठस्य परिशुद्धा वाचो वाल्मीकितपोवनं गत्वा तत्र वत्स्याम इति ।

वासन्ती—अथ स राजा किमाचारः सम्प्रति ?

आत्रेयी—तेन राज्ञा क्रतुरश्वमेध प्रक्रान्त ।

वासन्ती—हा धिक् । परिणीतमपि ।

आत्रेयी—शान्तं पापम् । नहि नहि ।

वासन्ती—का तर्हि यज्ञे सहधर्मचारिणी ?

आत्रेयी—हिरण्मयी सीताप्रतिकृति ।

वासन्ती—हन्त भो ।

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥

आत्रेयी—विसृष्टश्च वामदेवाभिमन्त्रितो मेध्योऽश्व । उपकल्पिताश्च यथाशास्त्रं तस्य रक्षितार । तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुरवाप्तदिव्यास्त्रसम्प्रदायश्चतुरङ्गसाधनेनान्वितोऽनुप्रहित ।

वासन्ती—[सस्नेहकौतुकास्रम्] कुमारलक्ष्मणस्यापि पुत्र । हन्त मातर्जीवामि ।

आत्रेयी—अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडम् अब्रह्मण्यमुद्घोषितम् । तत "न राजापचारमन्तरेण प्रजास्वकालमृत्यु सञ्चरति" इत्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत—

शम्बूको नाम वृषल पृथिव्यां तप्यते तप ।
शीर्षच्छेद्य स ते राम तं हत्वा जीवय द्विजम् ॥

इत्युपश्रुत्यैवाऽकृष्टकृपाणपाणि पुष्पकं विमानमारुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पति सञ्चरितुमारब्धवान् ।

वासन्ती—शम्बूको नाम धूमप शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति । तदपि नाम रामभद्र पुनरपीदं वनमलङ्कुर्यात् ।

आत्रेयी—भद्रे, गम्यतेऽधुना।

वासन्ती—अयि आत्रेयि, एवमस्तु। कठोरीभूतस्तु दिवस।

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सपातिभिः,
घर्मस्रसितबन्धनै स्वकुसुमैरर्चन्ति गोदावरीम्।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वच,
कूजत्क्लान्तकपोतकुक्कुटकुला कूले कुलायद्रुमा॥

[इति निष्क्रान्ते]

धर्मबुद्धि-कथा

कस्मिंश्चिदधिष्ठाने धर्मबुद्धि पापबुद्धिश्चेति द्वे मित्रे प्रतिवसत स्म। अथ कदाचित्पापबुद्धिना चिन्तितम्—'अहं तावन्मूर्खो दारिद्र्योपेतश्च, तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वास्याश्रयेणार्थोपार्जनं कृत्वैनमपि वञ्चयित्वा सुखीभवामि।'

अथान्यस्मिन्नहनि पापबुद्धिर्धर्मबुद्धिं प्राह भो मित्र! वार्धकभावे किं त्वमात्मविचेष्टितं स्मरसि? देशान्तरमदृष्ट्वा कां शिशुजनस्य वार्तां कथयिष्यसि। उक्तञ्च—

देशान्तरेषु बहुविधभाषावेशादि येन न ज्ञातम्।
भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थम्॥

अथ तस्य तद्वचनमाकर्ण्य प्रहृष्टमनास्तेनैव सह गुरुजनानुज्ञात शुभेऽहनि देशान्तरं प्रस्थित। तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तमासादितम्। ततश्च द्वावपि तौ प्रभूतोपार्जितद्रव्यौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन निवृत्तौ।

अथ स्वस्थानसमीपवर्तिना पापबुद्धिना धर्मबुद्धिरभिहित—'भद्र, न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते। यत कुटुम्बिनो बान्धवाश्च

प्रार्थयिष्यन्ते। तदत्रैव वनगहने क्वापि भूमौ निक्षिप्य किञ्चिन्मात्र-मादाय गृहं प्रविशाव। भूयोऽपि प्रयोजने सञ्जाते तन्मात्रं समेत्यास्मात्स्थानान्नेष्याव।

तदाकर्ण्य धर्मबुद्धिराह—'भद्र। एवं क्रियताम्। तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेन संस्थितवन्तौ। अथान्यस्मिन्नहनि पापबुद्धिर्निशीथेऽटव्यां गत्वा तत्सर्वं वित्तं समादाय गर्तं पूरयित्वा स्वभवनं जगाम। अथान्येद्युर्धर्मबुद्धिं समभ्येत्य प्रोवाच—'सखे। बहुकुटुम्बा वयं वित्ताभावात्सीदाम। तद्गत्वा तत्र स्थाने किञ्चिन्मात्रं धनमानयाव।' सोऽब्रवीत्—'भद्र, एवं क्रियताम्।'

अथ द्वावपि गत्वा तत्स्थानं यावत् खनतस्तावद्रिक्तं भाण्डं दृष्टवन्तौ। अत्रान्तरे पापबुद्धिः शिरस्ताडयन्प्रोवाच—'भो धर्मबुद्धे, त्वया हृतमेतद्धनं नान्येन। यतो भूयोऽपि गर्तापूरणं कृतम्। तत् प्रयच्छ मे तस्यार्धम्। अथवाहं राजकुले निवेदयिष्यामि।' स आह—'भो दुरात्मन्, मैवं वद। धर्मबुद्धिः खल्वहम्। नैतच्चौरकर्म करोमि।'

एवं द्वावपि तौ विवदमानौ धर्माधिकारिणं गतौ, प्रोचतुश्च परस्परं दूषयन्तौ। अथ धर्माधिकरणाधिष्ठितपुरुषैर्दिव्यार्थे यावन्नियोजितौ तावत्पापबुद्धिराह—'अहो, न सम्यग् दृष्टोऽयं न्यायः उक्तञ्च—

विवादेऽन्विष्यते पत्रं तदभावेऽपि साक्षिणः।
साक्ष्यभावात्ततो दिव्यं प्रवदन्ति मनीषिणः॥

तदत्र विषये मम वृक्षदेवताः साक्षिभूतास्तिष्ठन्ति। ता अप्यावयोरेकतरं चौरं साधुं वा करिष्यन्ति।' अथ तैः सर्वैरभिहितम् 'भोः। युक्तमुक्तं भवता। तदस्माकमप्यत्र विषये महत्कौतूहलं वर्तते। प्रत्यूषसमये युवाभ्यामप्यस्माभिः सह तत्र वनोद्देशे गन्तव्यम्' इति। एतस्मिन्नन्तरे

पापबुद्धि स्वगृह गत्वा स्वजनकमुवाच—'तात, प्रभूतोऽय मयार्थो धर्मबुद्धेश्चोरित । स च तव वचनेन परिणति गच्छति । अन्यथास्माक प्राणै सह यास्यति ।'

स आह—'वत्स ! द्रुत वद, येन प्रोच्य तद् द्रव्यं स्थिरता नयामि ।' पापबुद्धिराह —'तात, अस्ति तत्प्रदेशे महाशमी । तस्यां महत्कोटरमस्ति । तत्र त्वं साम्प्रतमेव प्रविश । तत प्रभाते यदाह सत्यश्रावणं करोमि, तदा त्वया वाच्य यद् 'धर्मबुद्धिश्चौर ' इति ।'

तथानुष्ठिते प्रत्यूपे स्नात्वा पापबुद्धिर्धर्मबुद्धिपुर सरो धर्माधिकरणकै सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच—

'आदित्यचन्द्रावनिलोऽनलश्च,
द्यौर्भूमिरापो हृदय यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये,
धर्मश्च जानाति नरस्य वित्तम् ॥

भगवति वनदेवते ! आवयोर्मध्ये यश्चौरस्त कथय ।' अथ पापबुद्धिपिता शमीकोटरस्थ प्रोवाच—'भो ! शृणुत शृणुत । धर्मबुद्धिना हृतमेतद्धनम् ।'

तदाकर्ण्य सर्वे ते राजपुरुषा विस्मयोत्फुल्ललोचना तावद्धर्मबुद्धेर्वित्तहरणोचित निग्रह शास्त्र-दृष्ट्या अवलोकयन्ति, तावद्धर्मबुद्धिना तच्छमीकोटर वह्निभोज्यद्रव्यै परिवेष्ट्य वह्निना सन्दीपितम् ।

अथ ज्वलति तस्मिञ्छमीकोटरेऽर्धदग्धशरीर स्फुटितेक्षण करुण परिदेवयन्पापबुद्धिपिता निश्चक्राम । ततश्च तै सर्वै पृष्ट —'भो किमिदम्' इत्युक्ते स पापबुद्धिविचेष्टितं सर्वमिद निवेदयित्वोपरत ।

सामान्य-नीति-संग्रह

द्वितीयो गुम्फ

यद्यपि स्वेच्छया काम प्रकीर्णमभिधीयते ।
अनुज्झितार्थसम्बन्ध प्रबन्धो दुरुदाहरः ॥

महाजनस्य संसर्ग कस्य नोन्नतिकारक ।
पद्मपत्रस्थित वारि धत्ते मुक्ताफलश्रियम् ॥

चल वित्त चल चित्त चले जीवितयौवने ।
चलाचलमिद सर्व कीर्तिर्यस्य स जीवति ॥

अनुगन्तु सता वर्त्म कृत्स्न यदि न शक्यते ।
स्वल्पमप्यनुगन्तव्य मार्गस्थो नावसीदति ॥

चलत्येकेन पादेन तिष्ठत्येकेन पण्डित ।
नासमीक्ष्य पर स्थान पूर्वमायतन त्यजेत् ॥

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड् योगयुक्तश्च रणे सन्मुखमाहत ॥

नि सारस्य पदार्थस्य प्रायेणाडम्बरो महान ।
न सुवर्णे ध्वनिस्तादृग् यादृक्कांस्ये प्रजायते ॥

नवे वयसि य शान्त स शान्त इति मे मति ।
धातुषु क्षीयमाणेषु शान्ति कस्य न जायते ॥

सौवर्णानि सरोजानि निर्मातु सन्ति शिल्पिन ।
तत्र सौरभनिर्माणे चतुरश्चतुरानन ॥

क्वचिद्रुष्ट क्वचित्तुष्टो रुष्टस्तुष्ट क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्कर ॥

यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यो गां चरन्तीं निवारय ॥
सुखार्थी चेत्त्यजेद् विद्यां विद्यार्थी चेत्त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या सुखं विद्यार्थिनः कुतः ॥
धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥
न कालः खड्गमुद्दिश्य शिरः कृन्तति कस्यचित् ।
कालस्य बलमेतावद् विपरीतार्थदर्शनम् ॥
माता यस्य गृहे नास्ति भार्या च प्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥
कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥
अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥

स्वाभिमानी विद्वान्

कस्मिंश्चिद्ग्रामे कश्चित् प्रकृत्या दीनः सुपण्डितो भट्टाचार्यो निवसति । स एवं विश्वसिति प्रायो धनिनो निष्ठुराः, धनिनोऽसमीक्ष्यकारिणः धनिनोऽहङ्कारिणश्च भवन्ति । धनिनस्तु स्वमपि वपुर्वोढुं न शक्नुवन्ति माननीयानपि तिरस्कुर्वन्ति, सुस्थदेहा अपि विविधबाधा-

मभिनयन्ति, भ्रुवोस्तनोश्च कति भङ्गीस्तन्वन्ति, कति वा विभूतिशौर्य्यादीनि प्रकटयन्तीति च। तेन हि स भट्टाचार्य्य पीड्यमानोऽपि भूयसा दारिद्र्येण धनिद्वार नोपसर्पति, वर भिक्षामटति, कृच्छ्रेणापि दिनानि यापयति।

अहो दैवविडम्बना! एकदा ब्राह्मण्यास्ताडनामसहमान अनिच्छयापि धनान्यर्जितु स्कन्धनिहितकम्बल गृहीतकिञ्चित्पाथेयश्च विदेश निरगात्।

अथासौ कस्यचित् नवधनिकगृहमासाद्य कल्पयित्वा च विपणौ वासस्थानमवात्सीत्। तेन भट्टाचार्य्येण दिनत्रयात् पर धनिन साक्षात् कृतम्, विविधाश्च श्लोका रचिता व्याख्याताश्च, तेन हि धनी अतीव प्रीतो बभूव, कथयामास च, अहो भट्टाचार्य्यमहाशय! भवास्तु श्रेष्ठपण्डित विशेषतो रसिकश्च, अतो विशेष पूजयामि स्थीयतान्तावद्दिनानि कतिचिदिति।

एव प्रत्याशितो भट्टाचार्य्य मनसा नृत्यन्नास्ते। प्रत्यह प्रात. सायञ्च धनिसभायामागच्छति प्रतिगच्छति, वाग्मिता दर्शयति, श्लोकान् रचयति, समस्या पूरयति। महाराज! प्रतापेन त्वमर्क, कान्त्या त्व सोम, पवित्रतायां त्व पवन, शत्रुदहने त्व दहन, स्वच्छताया त्वमाप, निष्पापे त्व व्योम, धैर्य्ये त्व धरणि, दातृत्वे कर्ण, गुरुत्वे गिरि, गाम्भीर्ये सागर इत्यादि विविधस्तवेन राजानमुपश्लोकयति च।

एवं व्यतीते मासि भट्टाचार्य धनाशया समुद्विग्न धनिन न्यवेदयत्, महाराज! देश प्रति जिगमिषा त्वरयति वलीयसी, अतः सत्वरमनुजानीहि। तच्छ्रुत्वा तदापि धनी कथयति—कथमुद्विजसे? तिष्ठ तावत् कियन्ति दिनानि, भवन्त विशेपतस्तोषयामि, भवान् हि विद्यया विशि-

प्टोऽसि । ब्राह्मणोऽपि यथाज्ञापयति भवान् इति विरराम । पश्यति च कुलटा नर्त्तक्य, ऐन्द्रजालिका अभिचारिकाः, गायका, मल्ला, षण्डा, भण्डाश्च अनेके तस्माद्धनिनो धनरत्नहयहिरण्यादीनि लभन्ते इति समाश्वसिति च चेतसि ।

एव बहुकाले गच्छति अतीव समुद्विग्न जीर्णच्छिन्नमलिनवासा मूत्रक्लिन्नकम्बल अनाहारक्लिष्टश्च धनिगृह नैव गन्तव्यमिति प्राग्विश्वासं दृढीकुर्व्वंश्च ब्राह्मणो मनसा निर्भर्त्सयंश्च धनिन साक्षात् समुपस्थितो गोपारुणाक्ष उवाच—"अहो वदान्यप्रवर ।

गतागतेन पन्थान विशीर्णं चरणद्वयम् ।
तवाश्वासे त्रय नष्ट सम्बल कम्बल बलम् ॥"

इत्युक्त्वा उन्मनायमान द्रुत गच्छति अव्यक्त जल्पति च । तथा च स्वगृहमागत्य ब्राह्मणी समक्ष गर्ज्जन्निव बभाषे ।

अथैकदा स एव भट्टाचार्य काष्ठभार शिरसा वहन्नरण्यात् स्वगृहाभिमुख प्रत्यागत । मृगयार्थं तदेवारण्य विविक्षुणा तेन धनिना पथि दृष्ट पृच्छ्यते, 'भट्टाचार्य्य महाशय ! प्रणमामि, हहो किमित्येव श्रेष्ठपण्डितेन भवता शिरसि काष्ठभार समूह्यते पृथग्जनवत् ?' तदाकर्ण्य भट्टाचार्य्य काष्ठभार पुरतो निक्षिप्य कथयति—"शृणु वदान्यवर ।

संसेव्य ते प्रतिदिन नृप ! चित्ततोभान त्व परितुष्टो भुवनसुन्दर इन्दुरिन्द्र ।
त्वाशा हरस्य हरिणित्यमकृत वृत्राणामस्यानूनस्य फलमिन्धनमुद्वहामि ॥"

इत्युक्त्वा भट्टाचार्य्य स्कन्धान्तकाष्ठभार स्वगृह गत. ।

——

परित्यक्ता सीता

(ततः प्रविशति रथाधिरूढा सीता सारथिर्लक्ष्मणः)

लक्ष्मणः—इत इतोऽवतरत्वार्या, एतानि गहनतरुलताप्रतानसंरुद्धतया रथप्रवेशायोग्यानि भागीरथीतीरकाननानि, तदवतरत्वार्या ।

सीता—वत्स लक्ष्मण ! तीव्ररथवेगकम्पितदेहा अत्र न पारयति संस्थातुं, किं पुनरवतरितुम् ।

लक्ष्मणः—सुमन्त्र ! तुरङ्गमनियमने क्रियतां यत्नः ।

सुमन्त्रः—क्रियमाणमपि यत्नमतिवर्तन्ते गान्धर्वप्रिया वाजिनः ।

लक्ष्मणः—अतिरभसादनालक्षितसमविषमास्तुरङ्गमा गङ्गाप्रपाते स्यन्दनं विनिपातयन्ति ततः सर्वात्मना क्रियतां यत्नः ।

सुमन्त्रः—(रज्ज्वाकर्षणमभिनयति)

लक्ष्मणः—एष स्थितो रथः, तदवतरतु देवी ।

सीता—(अवतीर्य परिक्रामति)

लक्ष्मणः—सुमन्त्र, दीर्घमार्गपरिश्रान्ता एते तुरङ्गमाः, तद्विश्रामयैतान् ।

सुमन्त्रः—यदाज्ञापयति देवः । (इति रथमधिरुह्य निष्क्रान्तः)

लक्ष्मणः—(परिक्रम्यात्मगतम्)—समादिष्टोऽहमार्येण अथवा स्वामिना—'वत्स लक्ष्मण, देव्याः किल सीतायाः रावणभवनसंस्थानाच्चारित्रं प्रति समुत्पन्नविमर्शानां पौराणामन्यादृशाः प्रलापाः प्रवर्तन्ते, तन्न शक्नोमि सीतामात्रस्य कृते शरच्चन्द्रनिर्मलस्येक्ष्वाकुकुलस्य कलङ्कमुत्पादयितुम् । सीतया चाहं गर्भिणीभावसुलभेन दोहदेन भागीरथीदर्शनं प्रार्थितः । तस्मात् त्वमनेन गङ्गागमनव्याजेन सुमन्त्राधिष्ठितं रथमारोप्य कस्मिंश्चिद्वनोद्देशे परित्यज्य निवर्तस्व'—इति । तदहमपि स्वजनविस्रम्भनिविशङ्कां देवीमादाय गृहहरिणीमिव वध्यभूमिं वनमुपनयामि ।

सीता—वत्स लक्ष्मण, अतिशयितगर्भभरोद्वहनपरिश्रान्तौ न प्रभवतो मे चरणौ। तदग्रतो भूत्वा निवेदय कियद्दूरे भगवती भागीरथी वर्तत इति।

लक्ष्मण—ननु आसन्नैव भगवती भागीरथी, तदलं विषादेन, सम्प्राप्ता एव वयम्।

सीता—(गङ्गानिलशीतस्पर्शं नाटयति)—साम्प्रतं जननीकरस्पर्शसुखशीतलस्य भागीरथीतरङ्गमारुतस्य स्पर्शेन परिश्रमस्येव पापस्य मे परिक्षयो जातः। तथापि दोहदकुतूहलं गङ्गावगाहने मां समुत्साहयति। तदस्मात्तटप्रपातात् यथा परिश्रान्ता अवतरामि तथा देशय मे मार्गम्।

लक्ष्मण—(निर्दिश्य) अत्यन्तविश्रान्तमनुष्यसञ्चरणतया दुरवगाहास्तटप्रदेशाः तस्मात्प्रपदमास्थाय सम्यक्—

वामेन नीवारलतां करेण जानु समालम्ब्य च दक्षिणेन।
पदे पदे मे पदमादधाना शनैः शनैरेतु मुहूर्त्तमार्या ॥

सीता—(यथोक्तमवतीर्य) वत्स, सुष्ठु परिश्रान्तास्मि, एतस्याः पादपच्छायायां मुहूर्त्तमुपविश्य विश्रमयिष्यामि।

लक्ष्मण—यदभिरुचितं देव्यै।

(सीता उपविश्य विश्रान्तिं नाटयति)

सीता—यथा भगिनि कुमारेण, स्वजनसङ्गतायाः इवात्राभिरमते मे हृदयम्।

लक्ष्मण—(अपवार्य) एषा विश्रान्ता सुखोपविष्टा च देवी। तदयमेवावसरो यथास्थितं व्यवसितुम्। [प्रकाशम्] (सहसा पादयोर्निपत्य)—अयमनवरतप्रवासदुःखभागी निर्लज्जो लक्ष्मणो विज्ञापयति—'स्थिरीक्रियतां हृदयम्'।

सीता—(ससम्भ्रमम्)—अपि कुशलमार्यपुत्रस्य ?

लक्ष्मणः—(वन निर्दिश्य) एव गते कीदृश कुशलमार्यस्य ।

सीता—आर्य्यया कैकेय्या पुनरपि समादिष्टो वनवास ?

लक्ष्मण —समादिष्टो वनवाम , न पुनरम्बया ।

सीता—केन पुन समादिष्ट ?

लक्ष्मण —आर्येण ।

सीता—कथ समादिष्ट ?

लक्ष्मण —(बाष्पस्तम्भमभिनीय)

आर्यस्यादेश इत्येव वक्तुमिच्छामि यत्नत ।
तथापि हृदय गत्वा ग्रन्थि बध्नाति भारती ॥

सीता—कि मम समादिष्टो वनवाम ?

लक्ष्मण —न केवल तव, आत्मनोऽपि ।

सीता - कथमिव ?

लक्ष्मण —प्रकामभुक्ते स्वगृहाभिमानात् सुहृज्जनेनाहितयागवह्नौ ।
आर्यस्य रम्ये भवनेऽपि वासस्तव प्रवासे वनवास एव ॥

सीता—वत्स लक्ष्मण, स्फुट कथय, अद्य कथ मम वनवास आर्यपुत्रस्य वनवास इति ।

लक्ष्मण —किमपर कथयामि मन्दभाग्य ?

त्यक्ता किल त्वमार्येण चारित्रगुणशालिना ।
मयापि किल गन्तव्य त्यक्त्वा त्वामिह कानने ॥

सीता—हा तात ! आर्य कोसलाधिप ! अद्य उपरतोऽसि (मोह गच्छति)

लक्ष्मण —(ससम्भ्रमम) कष्ट भो ! कष्ट भो ! निर्घातपातदारुणेनानेन परित्यागवार्ताश्रवणेन नूनमुपरता देवी । (निर्वर्ण्य) दिष्ट्या श्वसिति । तत् को नु खलु अस्या प्रत्यानयनेऽभ्युपाय ? (विषाद नाटयति) आश्चर्यमाश्चर्यम—

भागीरथीशीकरशीतलेन सम्भाव्यमाना मृदुलानिलेन।
मङ्गान्यशेषेण च वोध्यमाना प्रत्यागता राजसुता कथञ्चित्॥

सीता—वत्स लक्ष्मण, किं गतोऽसि?

लक्ष्मण—तिष्ठाम्येष मन्दभाग्य।

सीता—किमुपालभ्यास्मि परित्यक्ता?

लक्ष्मण—कीदृशो देव्या उपालम्भ?

सीता—अहो मेऽधन्यत्वम्। किमुपालम्भमात्रेण विना निगृहीतास्मि? किमन्नि किमपि तेन सन्दिष्टम्?

लक्ष्मण—अस्ति।

सीता—कथय कथय।

लक्ष्मण—तुल्यान्वयेत्यनुगुणेति गुणोन्नतेति,
दुःखे सुखे न सुचिरं सहवासिनीति।
जानामि केवलमहं जनवादभीत्या,
सीते! त्यजामि भवतीं न तु भावदोषात्॥

इत्यार्यस्य सन्देशः।

सीता—कथं जनवादभीतेनेति? किमपि वचनीयं मेऽस्ति?

लक्ष्मण—कीदृशमार्याया वचनीयम्?

अग्निना लोकपालानामार्यस्य मम चाग्रतः।
अग्नौ शुद्धिं गता देवी किन्तु—

सीता—(लज्जां नाटयन्ति) कथय किन्तु—

लक्ष्मण—लोको निरङ्कुश।

सीता—अनिष्टुरहृदयेनेव प्रतिबोधितास्मि। रावणभवनोषितेति पुनर प्युपालभ्यते। सीता वा अपि नाम एवं सम्भाव्यते। इति स्वयमेव नहि ...। एवं परित्यक्ता। ननु परित्यक्तास्मि।

किन्तु खलु युक्त ममार्यपुत्रपरित्यक्तमात्मान परित्यक्तुम् ? किन्तु खलु तस्यैव निरनुक्रोशस्य समान एव प्रसव प्रेक्षितव्य इति वचनीयकण्टकोपहित जीवित परिरक्षामि ?

लक्ष्मण —अनुगृहीतोऽस्मि । (उत्थाय प्रणमति) इदमपरमार्येण सन्दिष्टम् ।

सीता—किन्नु खलु भविष्यति ।

लक्ष्मण —त्व देवि ! चित्तनिहिता गृहदेवता मे,

स्वप्नागता शयनमध्यसखी त्वमेव ।

दारान्तराहरणानि स्पृहमानसस्य,

यागे तव प्रतिकृतिर्मम धर्मपत्नी ॥

सीता—एव सन्दिशताऽऽर्यपुत्रेण परित्यागदुःख मयि निःशेषमपनीतम् ।

लक्ष्मण —क प्रतिसन्देश ?

सीता—कस्य ?

लक्ष्मण —आर्यस्य ।

सीता—एव गतेऽपि प्रतिसन्देश । श्वश्रूणा पुनर्मम वचनात् पादवन्दनं कृत्वा विज्ञापय—एवमह नीरक्षा श्वापदसमाकीर्णे वने प्रतिवसन्ती च सर्वेषा हृदयेनार्याभिरनुग्रहीतव्येति ।

लक्ष्मण —प्रतिगृहीतेयमाज्ञा । आर्यस्य न किञ्चित् समादिष्टम् ।

सीता—तथा निष्ठुरो नाम सन्दिश्यत इति अप्रतिहतवचनतैषा लक्ष्मणस्य, न सीताया धन्यत्वम् । तथा मम वचनात् त जन विज्ञापय 'मन्दभागिनीमनुशोचन् वर्णाश्रमपरिपालनमभिन्नन्नात्मान न बाधस्व । सद्धर्मे स्वशरीरे च सावधानो भव इति । वत्स लक्ष्मण, किमुपालभे महाराजम् ?

लक्ष्मण —किमेतावत्यपि न प्रभवति देवी ?

सीता—एवमपि त जन विज्ञापय—'न युक्त तव निरपराधमिम जन सपदि हृदयतो निर्वासयितु किं पुनर्विषयत' इति। किञ्चेदमपि मम वचनाद् विज्ञापयितव्य—"सा तपोवनवासिनी सर्वथा सीमन्तनिहितेनाञ्जलिना विनिवेदयति यदि अह निर्गुणा चिरपरिचितेति वा, अनाथेति वा, सीतेति वा स्मरणमात्र केणानुगृहीतव्येति।

लक्ष्मण—इम सन्देशमाकर्ण्य क्षते क्षारमिवाहितम्।
दशामसह्या शोकस्य व्यक्तमार्यो गमिष्यति॥

सीता—वत्स लक्ष्मण, प्रणमितव्या त्वया मम वचनाद् राघवकुलराजधानी भगवत्ययोध्या। शुश्रूषितव्य प्रतिमागतो महाराज। साधयितव्या श्वश्रूणामाज्ञप्ति। समाश्वासयितव्या प्रियंवदा मम प्रियसख्य। स्मर्तव्या सर्वकाल मन्दभागिनी (इति रोदिति)

लक्ष्मण—(विलोक्य) एते रुदन्ति हरिणा हरित विमुच्य,
हसाश्च शोकविधुरा करुण रुदन्ति।
नृत्य त्यजन्ति शिखिनोऽपि विलोक्य देवीं,
तिर्यग्गता वरममी न पर मनुष्या॥

सीता—वत्स लक्ष्मण, आसन्नास्तमय सूर्य, दूरे चेतो मानुषसम्पात, सञ्चरन्ति पतिगा, सञ्चरन्ति श्वापदा। गच्छ, न युक्त परिलम्बितुम्।

इक्ष्वाकूणां सन्ततिर्गर्भसंस्था

सेयं देव्या यत्नतो रक्षणीया ॥

सीता—अप्रतिहतवचनं खलु सौमित्रिः ।

लक्ष्मण—इयमपरा विज्ञापना ।

सीता—काऽन्या ?

लक्ष्मण—ज्येष्ठस्य भ्रातुरादेशादानीय विजने वने ।

परित्यक्तासि देवि त्वं दोषमेकं क्षमस्व मे ॥

सीता—ज्येष्ठवचनानुवर्ती त्वमिति परितोषकाले को दोष आशक्यते ?

लक्ष्मण—(सप्रदक्षिणं प्रणम्य परिक्रामति)

सीता—(रोदिति)

लक्ष्मण—(दिशोऽवलोक्य) भो भो लोकपाला ! शृण्वन्तु भवन्तः ।

एषा वधूर्दशरथस्य महारथस्य,

सीता—अतिश्लाघनीयान्यक्षराणि श्रूयन्ते ।

लक्ष्मण—रामाऽऽह्वयस्य गृहिणी मधुसूदनस्य,

सीता—कुतो मे तादृशं भागधेयम् ।

लक्ष्मण—निर्वासिता पतिगृहाद्

(सीता कर्णौ पिदधाति)

लक्ष्मण— विजने वनेऽस्मिन्,

एकाकिनी वसति रक्षत रक्षतैनाम् ॥

(प्रणम्य निष्क्रान्तः)

——

महाराज-भोजस्य सिंहासनोद्धार-कथा

अथ काले भोज-राज सिंहासन प्राप। तस्मिन् राज्य कुर्वति, एकदा कश्चिद् ब्राह्मणो यत्र सिंहासन निक्षिप्तम्, तत्क्षेत्रं कृष्ट्वा यवादीनवपत्। तस्मिन् क्षेत्रे महत् फलमभूत्। स ब्राह्मण यत्र तत् सिंहासन निक्षिप्त तदुच्चस्थानमिति मत्वा, पक्षिणामुत्थापनार्थं तदुपरि मञ्च कृत्वोपविश्य पक्षिण उत्थापयति।

ततः एकदा भोजराजो विहार कर्त्तुं सकल-राजकुमारै समवेतस्तत्क्षेत्र समीपे यावद्गच्छति, तावन्मञ्चोपरि स्थितेन ब्राह्मणेनोक्तम्—'भो राजन्! मदीयं क्षेत्र सम्यक् फलितमस्ति, ससैन्य समागत्य यथेच्छं भुज्यताम् अश्वेभ्यश्चणका दीयन्ताम्। अद्य मज्जन्म सफलमभूत्, यतो भवान् मम अतिथिर्जात, ईदृश प्रस्ताव कदा सम्भवति?" तच्छ्रुत्वा स राजा ससैन्य क्षेत्रं प्रविष्ट। अथ ब्राह्मणोऽपि मञ्चकादवतीर्य राजानं [illegible] भणति, "भो राजन्! किमयमधर्म क्रियते? इदं ब्राह्मण [illegible] कथम्? जनैरयमन्याय क्रियते, प्रतीकारार्थं तुभ्यं निवेदित, त्वमेवान्याये वर्त्तनं प्रवृत्त। इदानीं को वा निवारयिष्यति? भवान् धर्मरक्षकश्च, ब्राह्मणद्रव्य कथं नाशयति? ब्राह्मणस्वमतद् विषम। [illegible] —

भक्षयन्तु उर्वारुकफलानि सन्ति, उपभुज्यन्ताम्।' पुनर्ब्राह्मण-वचनमाकर्ण्य सपरिवारो राजा यावत् क्षेत्रमध्ये प्रविशति, तावत् पक्ष्युत्थापनार्थं मञ्चादवरुह्य स पुनस्तथैवाभणत्।

ततो राजा स्वमनसि विचारयति—"अहो आश्चर्यम्। यदायं ब्राह्मणो मञ्चमारोहति, तदास्य चेतसि 'दातव्य भोक्तव्य'मिति बुद्धिरुत्पद्यते, यदावतरति, तदा हीनबुद्धिर्भवति। तदहं मञ्चमारुह्य पश्यामि" इति मञ्चमारुरोह। भोजराजस्य चेतसि तदा वासनैवमभूत्,—"विश्वस्याति परिहरणीया, सर्वस्य लोकस्यापि दारिद्र्य सम्यक् निवारणीय, दुष्टा दण्डनीया, सज्जना पालनीया, प्रजा धर्मेण पालनीया, कि बहुना,—अस्मिन् समये यदि कश्चिच्छरीरमपि प्रार्थयिष्यते, तदपि देयम्" इति, आनन्दपरिपूर्ण पुनर्विचारयति,—"अहो! एतत् क्षत्रमस्यैवविधा बुद्धिमुत्पादयति। कथमेतत्क्षेत्रस्य माहात्म्य ज्ञायते?" इति विचार्य ब्राह्मणमाहूयावादीत्—"भो ब्राह्मण! तवैतस्मात् क्षेत्रात्कियल्लाभो भवति? अहमेतत् क्षेत्र क्रेतुमिच्छामि।' ब्राह्मणेनोक्तम्—'भो राजन् सकलकुशलेन त्वयाविदितं किमपि नास्ति, तदहेति यत्करोतु। राजा नाम साक्षाद्विष्णोरवतारभूत, तस्य दृष्टिर्यस्योपरि पतति, तस्य दैन्यदुर्भिक्षादयो नश्यन्ति। राजा हि साक्षात् कल्पवृक्ष, स त्व मम दृष्टेर्गोचरोऽभू अद्य मम दैन्य-दारिद्र्यादीनामवसान जातम्, क्षेत्र कियत्?'

ततो राजा ब्राह्मण धन-धान्यादिना परितोष्य, तत् क्षेत्र गृहीत्वा मञ्चकाध खानयितु प्रारम्भमकार्षीत्। पुरुषप्रमाणे गर्त्ते जाते, शिलैका सुमनोहरावलोकिता। तदधश्चन्द्रकान्त शिलाविनिर्मित, नानारत्नखचित, द्वात्रिंशत्पुत्तलिकाभिर्युक्तमतिरमणीय दिव्यमेक सिहासनमपश्यत्। तत्सिहासन दृष्ट्वा भोजराज परमानन्दलहरीपरिपूर्णहृदयो भूत्वा सिंहासन

ग्राम प्रति नेतु यावदुच्चालयति, तावदधिक गुरुर्भवति, नोच्चलति च। ततो मन्त्रिणमवदत्—"भो मन्त्रिन्! किमर्थमेतत् सिहासन नोच्चलति?" मन्त्रिणोक्तम्—"राजन्! एतत् सिहासन दिव्यमपूर्वञ्च, बलिहोमपूजादिक विना नोच्चलिष्यति, तत्र साध्यश्च न भविष्यति" इति।

तस्य वचन श्रुत्वा राजा ब्राह्मणानाहूय, तैः सर्वमपि विधान कारितवान्। ततस्तत् सिहासन लघु भूत्वा स्वयमेवोच्चलति स्म।

भवभूति-कालिदासयोः काव्य-परीक्षा

[illegible] सिंहासनमलङ्कुर्वाणे श्रीभोजे द्वारपाल आगत्य प्राह, "[illegible] कोऽपि भवभूतिर्नाम कविर्द्वारि तिष्ठति" इति। राजा प्राह, "प्रवेशय" इति। ततः प्रविष्टः सोऽपि सभामगात्। [illegible] तदागमनेन तुष्टा अभूवन्। राजा च भवभूति प्रेक्ष्य [illegible] स्म। स च "स्वस्ति" इत्युक्त्वा तदाज्ञया उपविष्टो भवभूति [illegible]—[illegible]।

[illegible] मधुनि मधुपा पारिजातप्रसूनै,
[illegible] तुहिन[illegible]चन्द्रिकाया [illegible]।
[illegible] पर्वतनाग ?
[illegible] स्वयमिह [illegible] किं सुधा[illegible] ॥

निःश्वासोऽपि न निर्याति बाणे हृदयवर्त्मनि ।
किं पुनः प्रकटाटोपपदबद्धा सरस्वती ॥

ततो भवभूतिः पराभवमसहमानः प्राह,

"हठादाकृष्टानां कतिपयपदानां रचयिता,
जनः स्पर्द्धालुश्चेदहह ! कविना वश्यवचसा ।
भवेदद्य श्वो वा किमिह बहुना पापिनि कलौ,
घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः ॥"

पुनराह—

"कालिदासकवेर्वाणी कदाचिन्मद्गिरा सह ।
कलयत्यर्थसाम्यं चेद्भीता भीता पदे पदे ॥"

ततः कालिदासः प्राह, "सखे भवभूते ! महाकविरसि, अत्र किमु वक्तव्यम् ?

एषा धारेन्द्रपरिषन्महापण्डितमण्डिता ।
आवयोरन्तरं वेत्ति राजा वा शिवसन्निभः ॥"

राजा कालिदासं प्राह, "सुकवे ! भवभूतिना सह साम्यं तव न वक्तव्यम् ।" भवभूतिराह, "देव ! किमिति वारयसि ?" राजाह— "सर्वप्रकारेण कविरसि ।" ततो बाणः प्राह—"राजन् ! भवभूतिः कविश्चेत्, कालिदासः किं वक्तव्यः ?" राजाह—"बाणकवे ! कालिदासः कविर्न, किन्तु पार्वत्याः कश्चिदवनीपुरुषावतार एव ।" ततो भवभूतिराह—"देव ! किमत्र प्राशस्त्यं भाति ?" राजा प्राह— "भवभूते ! सर्वमेव प्राशस्त्यं कालिदासकाव्ये, ततो भवभूतिराह— "देव ! पक्षपातेन वदसि ?" इति । ततः कालिदासः प्राह—"देव ! अपख्यातिर्माभूत् । भुवनेश्वरीदेवतालयं गत्वा तत्सन्निधौ तां पुरस्कृत्य

घटे मशोधनीय त्वया।' ततो भोज सर्वकविवृन्दपरिवृत सन् भुवनेश्वरीदेवालय प्राप्य, तत्र तत्सन्निधौ भवभूतिहस्ते घट दत्वा श्लोकद्वयञ्च तुल्यपत्रद्वये लिखित्वा तुलाया मुमोच। ततो भवभूतिभागे लघुत्वोद्भूता ऽपकृष्टानि ज्ञात्वा, देवी भक्तपराधीना, सदसि तत्परिभवो मा भूदिति स्वावतंसकह्लारमकरन्द वामकरनखाग्रेण गृहीत्वा, भवभूतिपत्रे चिक्षेप। तत कालिदास प्राह—

"घटो मे सौभाग्य मम च भवभूतेश्च भणितं,
तुलायामारोप्य, प्रतिफलति तस्यां लघिमनि।
गिरां देवी सद्य श्रुतिकलितकह्लारकलिका-
मधूलीमाधुर्य क्षिपति परिपूर्त्यै भगवती॥"

तत कालिदासपादयो पतति भवभूति, राजानञ्च विशेषज्ञं मनुते स्म। ततो राजा भवभूतिकवये शत मत्तगजान् ददौ।

चोरस्य चातुर्यम्

प्रत्यासन्नेऽपि मरणे रक्षोपायो विधीयते।
उपाये सफले रक्षा भवत्येव न संशयः॥

चौर उवाच—'रे रे घातकपुरुषा, त्रयश्चौरा युष्माभिर्हता एव। इदानीं राजाग्रे मद्वचनं श्रावयित्वा मारयत। यतोऽहमेकां महतीं विद्यां जानामि, मयि मृते साऽस्तं यास्यति। राजा तु तां गृहीत्वा मां मारयतु। येन विद्या मर्त्यलोके तिष्ठेत्॥'

घातका ऊचुः—'रे चौर पुरुषाधम! वध्यस्थानमानीतोऽसि। किमधुना जीवितुमिच्छसि? का विद्यां जानासि? कथं वाधमस्य विद्या भूपालेन ग्रहीतव्या?'

चौर उवाच—'रे घातकाः, किं ब्रूथ? राजकार्यबाधां कर्तुमिच्छथ! यदि राजा ज्ञास्यति तदावश्यं तेन ग्रहीतव्या महतीयं विद्या। किञ्च, विद्यावार्ताकथकेभ्यो युष्मभ्यमपि प्रभुणा प्रसादः कर्तव्यः।'

ततस्तस्य चौरस्य वचनात् स्वामिकार्यानुरोधेन घातकैः सा वार्ता राज्ञे निवेदिता। राजा च कौतुकमाकर्ण्य चौरमाहूय प्रष्टुमारभत—राजोवाच—'रे का विद्यां जानासि?' चौर उवाच—'देव, सुवर्णकृषिं जानामि।' राजोवाच—'का परिपाटी?'

चौर उवाच—'देव, सर्षपपरिमाणानि सुवर्णबीजानि कृत्वा भूमावुप्यन्ते। मासमात्रेण सर्षपसदृशा एव कन्दला भवन्ति। देव प्रत्यक्षं पश्यतु।' राजोवाच—'चौर, सत्यमेतत्?' चौर उवाच—'देवस्य पुरतः कस्यासत्यभाषणे शक्तिः? यदि मम वचनं व्यभिचरति, तदा मासान्ते समाप्यन्तो भविष्यति। तदापि देवः शास्तकरणे च प्रभुरेव स्थास्यति।'

राजोवाच—'भद्रम्, वप सुवर्णम्।' ततश्चौरः सुवर्णं दापयित्वा सर्षपमात्राणि बीजानि कृत्वा राजान्तःपुरक्रीडासरसस्तटे परमनिगूढस्थाने भूपरिष्कारं कृत्वा बभाषे–'देव, क्षेत्रबीजे सम्पन्ने। वप्ता कश्चिद्दीयताम्।'
राजोवाच—'त्वमेव किं न वपसि?'

चौर उवाच—'यदि सुवर्णवपने ममैवाधिकारो भवति तदा किमहं दुःखी भवामि? किन्तु सुवर्णवपने चौरस्याधिकारो नास्ति। येन कदापि किमपि न चोरितमस्ति स वपतु। देव एव किं न वपति?'

राजोवाच—'मया चारणेभ्यो दातुं तातचरणानां धनं चोरितम्।'

चौर उवाच—'तर्हि मन्त्रिणो वपन्तु।'

मन्त्रिण ऊचुः—'वयं राजोपजीविनः कथमस्तेयिनो भवामः?'

चौर उवाच—'तर्हि धर्माधिकारी वपतु।'

धर्माधिकारी उवाच—'ममापि बाल्यदशायां मातुर्मोदकाश्चोरिताः।'

नव-रस-सरसी

शृङ्गारः

शम्भुस्वयम्भुहरयो हरिणेक्षणाना
येनाक्रियन्त सतत गृहकर्मदासा ।
वाचामगोचरचरित्रविचित्रिताय
तस्मै नमो भगवते कुसुमायुधाय ॥

उपनिषद परिपीता गीतापि च हन्त मतिपथ नीता ।
तदपि न सा विधुवदना मानससदनाद् बहिर्याति ॥

अरविन्दमिद वीक्ष्य खेलत्खञ्जनमञ्जुलम् ।
स्मरामि वदन तस्याश्चारु चञ्चललोचनम् ॥

वनी मुनीनामटवी तरूणा दरी गिरीणा तु गवेषितैव ।
इत पर लक्ष्मण । पक्ष्मलाक्षी प्राणा वहिर्भूय गवेषयन्तु ॥

हास्यरसः

कमले कमला शेते हर शेते हिमालये ।
क्षीराब्धौ च हरि शेते मन्ये मत्कुणशकया ॥

स्वय पञ्चमुख पुत्रौ गजानन-षडाननौ ।
दिगम्बर कथ जीवेदन्नपूर्णा न चेद् गृहे ॥

सदा वक्र सदा क्रूर सदा पूजामपेक्षते ।
कन्याराशिस्थितो नित्य जामाता दशमो ग्रह ॥

वाचयति नान्यलिखित लिखितमनेनापि वाचयति नान्य ।
अयमपरोऽस्य विशेष स्वयमपि लिखित न वाचयति ॥

शिक्षितापि सखिभिर्ननु सीता रामचन्द्रचरणौ न ननाम।
किं भविष्यति मुनीशवधूवद् भालरत्नमिह तद्रजसेति ॥

करुणः

विकृन्ततीव मर्माणि देहं शोषयतीव मे ।
दहतीवान्तरात्मानं क्रूरः शोकाग्निरुत्थितः ॥
देशे देशे कलत्राणि देशे देशे च बान्धवाः ।
तं देशं नैव पश्यामि यत्र भ्राता सहोदरः ॥
मार्गे पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥
[illegible] पदा[illegible]समागितिरिति हन्त जाते
[illegible] च सम्प्रति दिनम्प्रति बन्धुरत्ने ।
[illegible] निजामवस्थां
[illegible] वचनैर्मनागपि ॥

वीरः

तनुत्राणं तनुत्राणं शस्त्रं शस्त्रं रथो रथः ।
इति शुश्रुविरे विश्वगुद्भयः सुभटोक्तयः ॥
वेतण्डगण्डकण्डूति पाण्डित्यपरिपन्थिना ।
हरिणा हरिणालीषु कथ्यतां कः पराक्रमः ॥

रौद्रः

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणि
रुत्तंसयिष्यति कचास्तव देवि ! भीमः ॥

स्पृष्टा येन शिरोरुहे नृपशुना पाञ्चालराजात्मजा
येनास्याः परिधानमप्यपहृतं राज्ञां कुरूणां पुरः ।
यस्योरःस्थलशोणितासवमहं पातुं प्रतिज्ञातवान्
सोऽयं मद्भुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः ॥

भयानकः

इदं मघोनः कुलिशं धारासन्निहितानलम् ।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय केवलम् ॥

मन्थायस्तार्णवाम्भः प्लुतकुहरचलन्
मन्दरोद्ध्वानधीरः,
कोणाघातेषु गर्जत्प्रलयघनघटाऽ-
न्योन्यसंघट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनो-
त्पातनिर्घातवातः,

केनास्मत्सिंहनादप्रतिरसितसखो
दुन्दुभिस्ताडितोऽयम् ॥

बीभत्सः

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथू-
च्छोफभूयांसि मांसा
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभा-
न्युग्रपूतीनि जग्ध्वा ।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः
प्रेतरङ्कः करङ्कात्,
अङ्कस्थादस्थिसंस्थं स्थपुटगतमपि
क्रव्यमव्यग्रमत्ति ॥

अद्भुतः

शान्तरसः

पाषाणखण्डेष्वपि रत्नबुद्धि,
कान्तेति धी शोणितमांसपिण्डे।
पञ्चात्मके वर्ष्मणि चात्मभावो,
जयत्यसौ काचन मोहलीला॥

वाताभ्रविभ्रममिद वसुधाधिपत्य
आपातमात्रमधुरो विषयोपभोग।
प्राणास्तृणाग्रजलबिन्दुसमा नराणा,
धर्म सखा परमहो परलोकयाने॥

भिक्षाशन तदपि नीरसमेकवार
शय्या च भू परिजनो निजदेहमात्रम्।
वस्त्र च जीर्णशतखण्डमलीनकन्था,
हा! हा! तथापि विषया न परित्यजन्ति॥



देवशर्म-कथा

कस्मिंश्चिदधिष्ठाने देवशर्मा नाम ब्राह्मण प्रतिवसति स्म। तस्य भार्या सुतमजनयत्। तस्मिन्नेव दिने काचित् नकुली तत्रैव नकुलमेक प्रसूय मृता। अथ सा सुतवत्सला दारकवत्तमपि नकुल स्तन्यदानाभ्यङ्गमर्दनादिभि पुपोष। पर तस्य न विश्वसिति, अपत्यस्नेहस्य सर्वस्नेहातिरिक्ततया सतत एवमाशङ्कते यत्कदाचिदेष स्वजातिदोषवशादस्य दारकस्य विरुद्धमाचरिष्यतीति।

राज्ञां प्रणामाञ्जलिसंपुटेषु किमप्यवज्ञामुकुलीकृताक्ष ।
तस्यैकहस्ताम्बुरुहप्रणामे कृतार्थमात्मानममस्त देव ॥

प्रतिक्षण कुन्तलपार्थिवस्य वितन्वतस्तन्मुखचुम्बनानि ।
तदीयदन्तच्छदजन्मनेव रागेण चेत परिपूर्णमासीत् ॥

मुखेन्दुसचारकृताभिलापकुरङ्गभीत्यर्थमिवार्पितेन ।
कण्ठावसक्तेन स राजसूनुरराजत व्याघ्रनखाङ्कुरेण ॥

क्रीडन्समुत्सारितवारनारीमञ्जीरनादागतराजहस ।
एक क्षिते पालयिता भविष्यन्स राजहसासहनत्वमूचे ॥

स पीडयन्नायसपञ्जरस्थान् क्रीडापर केशरिणा किशोरान् ।
समाददे भाविरिपुद्विपेन्द्रयुद्धोपयोगीव तदीयशौर्यम् ॥

प्राप्तोदय पादनखैश्चकासे स बालचन्द्र परिवर्धमान ।
अभ्यर्थ्यमान सह खेलनाय बालैरपत्यैरिव शीतरश्मे ॥

परा प्रतिष्ठां लिपिषु क्रमेण जगाम सर्वासु नरेन्द्रसूनु ।
पुण्यात्मनामत्र तथाविधाना निमित्तमात्र गुरवो भवन्ति ॥

भक्ताम्बरीष-प्रतापः

आसीदशेषगुणवशीकृतजनमानस विष्णुभक्तिपरायण अम्बरीषोनाम कश्चिन्नृपति ।

विद्यया शीलेन विश्वजनीनप्रेम्णा च तस्मिन्ननुरक्ता प्रकृतय सुख मूषु । निरन्तरमसौ तद्गतेन चेतसा भगवन्नामकीर्त्तयन् कृतार्थमात्मान मन्यते स्म ।

स हि भगवच्चरणयोर्मन तद्गुणवर्णने वाच, तत्कथाश्रवणे कर्णौ, तन्मूर्त्तिदर्शने दृशौ, तद्गृहमार्जने करौ, तत्पुण्यालयगमने च पादौ, नियुज्य परा प्रीतिमवाप ।

दरिद्रता

चारुदत्त —(ऊर्ध्वमवलोक्य सनिर्वेद यावन्निश्वसिति तावत्)

विदूषक —एष आर्यचारुदत्त । तद् यावत्साम्प्रतमुपसर्पामि ।
(उपसृत्य) स्वस्ति भवते । वर्धता भवान् ।

चारु०—सर्वकालमित्र मैत्रेय प्राप्त । सखे ! स्वागतम्, आस्यताम् ।

विदू०—भो इत्थ किं चिन्त्यते ?

चारु०—वयस्य !

सुख हि दु खान्यनुभूय शोभते,
वनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रताम्,
धृत शरीरेण मृत स जीवति ॥

